
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

१

मा०दि०

श्रीगणेशायनमः॥ यज्जगद्वितनुतेविषमंयत्क्षोपनेनयनराश्रुतिराक्ते॥ देवर्ध्दमपिय
द्वराभास्तेकर्मतज्जयतिमुक्तिनिदानं॥१॥ भाट्टदिनकरग्रंथमसत्तर्कतमोपहं॥ ततोसुभारामव्र
ल्लोनत्वादिनकरःसुधीः॥२॥ दारेष्विवनिबंधेषुजीर्णेषुसुधियांग्रहः॥ वयसःक्षपणायैवनरसा
यकस्यचन॥३॥ आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानांतस्मादनित्यमुच्यते॥ अथातोध
र्मजिज्ञासेतिसूत्रेकोधर्मःकथंलक्षणकःकान्यस्यसाधनानिकानिसाधनाभासानिकिंपरश्चे
तिभाष्येवाकारप्रश्लेषेणाचतुर्विधंधर्माधर्मनिरूपणंप्रतिज्ञातं॥ यत्तुधर्मोक्षादस्त्राविधंधर्म
निरूपणमाचार्यैरुक्तंतद्भाष्योक्तचतुर्विधनिरूपणांतर्गतमेव॥ तत्रप्रथमेध्यायेधर्मप्रमाणंनि
रूप्यतइतिमिश्राः॥ वेदप्रामाण्यमितिसोमेश्वरः॥ विधिप्रामाण्यमितिप्राभाकरः॥ अत्रोत्तर
मतेनयुक्तं॥ स्मृत्याचारयोर्वेदविधित्वाभावेनतत्प्रामाण्यसाधनासंगतिप्रसक्तेः॥ तत्रार्थभावना

१

तदेवमपौरुषेयशब्दभावनाप्रतिपादकस्य विधिवाक्यरूपस्य वेदैकदेशस्य बंधव्यवस्थापादेन प्रामाण्ये साधिते वेदा-
वयवत्वेनोपस्थितानामर्थवादमंत्रनामधेयानामिह प्रामाण्यं साध्यते। तत्र नामधेयानां विध्येकवाक्यत्वे-
नांतरंगत्वेपि विधेयनादिपदनामत्वस्यार्थवादोक्ततद्व्यपदेशाद्यन्तत्वाद्विध्यपेक्षितप्राशस्त्यसमर्पकत्वेन
मंत्रापेक्षयांतरंगत्वाच्चार्थवादेषु पूर्वं चिंता क्रियते। किमेते धर्मे प्रमाणमुत नेति। तदर्थं च किं विधिनैका-
मेकवाक्यत्वमस्त्युत नेति चिंत्यते। तदर्थमपि किं विध्यर्थवादयोः परस्परकांक्षास्ति न वेति चिंत्यं। तत्रा-
र्थवादानां न धर्मे प्रमाणं। तस्माद्बर्हिषि रजतं न देयमिति निषेधशेषस्य सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं
तस्य यदश्र्वशीर्यत तद्रजतमभवदित्यर्थवादस्यार्थेऽग्निरोदनादेः सत्त्वसंदेहेन। प्राजापत्यं तूपर-
मालभेत पशुकाम इति विधिशेषेण प्रजापतिरात्मनो वपामुदखिदत्तामग्नौ प्रागृह्णात्ततोऽजस्तूपरः
समभवदित्यर्थवादेनोक्तस्य स्ववपाहोमस्याशक्यत्वेन स्वार्थेऽप्रामाण्याद्वायव्यं श्वेतमालभेत
भूतिकाम इति विधिशेषस्य वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं ग-

२

गोणी ५

भा०दि०ग्रं०

मपतीत्यर्थसत्त्वेपि धर्माधर्मप्रतिपादकत्वाच्च। न च यथा स्वर्गकामो यजेतेत्यत्रापूर्वं कृत्वेत्यध्याहारः
यथा वा प्रतितिष्ठंतीत्यत्र प्रतिष्ठासंतीति विपरिणामः। यथा वा विश्वजिदादिकेष्वश्रुतस्वर्गकामपदाध्या
हारः। यथा वा धावतोश्वानित्यत्र प्रतिग्राहयेदिति व्यवधारणा। यथा वा एतयान्नाद्यकामं याजयेदित्य
त्र यजेदिति व्यवधारणा। यथा वा जातपुत्रस्सत्रार्द्धवयोनतिक्रमे लक्षणा। यथा वा यो होता सोध्वर्यु
रित्यत्राध्वर्युकार्यकारित्वे लक्षणा। तथार्थवादेष्वपि किंचित्कल्प्यतामिति वाच्यं। तात्पर्यानवगत्यो
निर्णयाभावात्। न चैषां विध्येकवाक्यत्वात्प्राशस्त्ये लक्षणा। अर्थवादस्याख्यायिकावदर्थप्रतिपादने
न विधेश्चाशास्त्रत्वविशिष्टभावनाविधानेनैराकांक्ष्यात्। एकवाक्यतासिद्धौ लक्षणासिद्धिः लक्ष
णासिद्धौ चैकवाक्यतासिद्धिरित्यन्योन्याश्रयाच्च। न चानेकशिष्टपरिग्रहानुपपत्त्या लक्षणा। पुरुषा
धीनप्रामाण्यप्रसंगात्। न च विधिजन्यप्रवृत्तिप्रतिबंधकालस्यादिभंगार्थं प्रवृत्तिविषयेष्टाजन
नार्थं प्राशस्त्यलक्ष्यं विधित एव तत्सिद्धेः। किं चेदं प्राशस्त्यं। न तावदिष्टसाधनत्वं बलवदनि

२

3

न

ष्टाननुबंधित्वं वा । विधिनैव तद्बोधनात् । नापि देवताक्षेपि छत्वादि । अनुगमाद्व्याप्यत्वाच्चानन्वप्राश्

स्यज्ञानस्य प्रयोजनमस्ति । ससपितस्मिन्नप्रयुक्तेरससपितस्मिन्नप्रयुक्तेश्च । प्रत्यक्षविरोधाद्दृष्यर्थ

वादानामप्रामाण्यात् । तथा हि प्रवरानुमंत्रणमंत्रविधौ न चैतद्विद्मो ब्राह्मणा वेस्म इत्यर्थवादः श्रूयते ॥ न   ते २

च ब्राह्मणत्वाज्ञानसंदेहविपर्ययान्यतमत्सत्तिप्रबाधं तच्च प्रत्यक्षविरुद्धं ब्राह्मण्यस्य प्रत्यक्षत्वात् । ननु

ब्राह्मणत्वं न प्रत्यक्षं तदभिव्यंजकपितृगतब्राह्मण्यग्रहणासंभवात् न तावदनुमानेन तत्संभवति उपवी

तादेः क्षत्रियादावपि सत्वेनाव्यभिचारादेर्दुष्टेर्देपि संभवेन लिंगाभावात् । नाप्याप्तवाक्येन । तत्समाज

नकासंभवेनाप्तत्वस्यासंभवात् । न चाप्तस्याप्तवाक्यं प्रमापकं अंधपरंपरापत्तेः । नापि मात्रवाक्यं

तस्याः स्वस्मिन्नभर्तरि च ब्राह्मण्यसंदेहात् । न च पद्व्यक्तिप्रत्यक्षं तज्जातिविषयकमिति नियमः

अप्रमाणविदंत्वेनाव्यक्तिप्रत्यक्षेपि तद्गतश्रुतित्वादिजातेरप्रत्यक्षत्वात् । नन्वेवं ब्राह्मणोयमिति

प्रतीतेः का गतिः । उच्यते । ज्ञातस्त्रावगतस्य ब्राह्मण्यस्योपनीतभानमेतत् । न च शूद्रेप्युपनीतभानं

३

स्यादितिवाच्यं॥ आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति न्यायात् उपना
यकव्यक्तिव्यवहाराभावाच्चेति चेत् अत्रोच्यते पितृगतब्राह्मण्यज्ञानमाप्तवाक्यादिना भव
तीति निर्विवादं। तस्य च विषययाथार्थ्ये प्रमात्वे भविष्यतीति तदभावे भ्रमत्वं। ब्राह्मण्यज्ञानस्य च त
त्त्वेनैव पुत्रगतब्राह्मण्यप्रत्यक्षे कारणता न प्रमात्वेन गौरवात्। ब्राह्मण्यं च गोर्ग विजातो गौरीति
वे न ब्राह्मणात् ब्राह्मण्यामुत्पन्नत्वात् व्यभिचारजेपि ब्राह्मण्यप्रसक्तेः। किं तु ऊढायां सवर्णायां
सवर्णा वोढुरुत्पन्नत्वं। सवर्णेभ्यः सवर्णासु जायते हि सजातयः। जात्युत्कर्षो युगे ज्ञेयः पंचमे स
प्तमे पि चेति शास्त्रयोर्विन्नास्येव विधिः स्मृत इति शास्त्रेणासंकोचात्। विषये तु व्यभिचारजेपि पद
वताद्युत्पन्ने ब्राह्मण्यमस्ति। अपुत्रा गुर्वनुज्ञातो देवरः पुत्रकाम्यया। सपिंडो वा सगोत्रो वा घृ
ताभ्यक्त ऋतावियादिति स्मृत्या व्यभिचारजन्यत्व दोषाभावावगतेः। मूर्द्धा[illegible]षिक्तादिसंज्ञावृ
त्तिस्मिन्संज्ञोत्तरविधानेन ब्राह्मण्यावगतेश्च। अन्यथा प्रसक्त्यभावेन श्राद्धे कुंडगोलकनिषे

भि २

३

धानुपपत्तेः । यत्तु विज्ञानेश्वरेण भ्रमप्रसक्तस्यायं निषेध इत्युक्तं तन्न । चण्डालादेरपि निषेधाप
त्तेः । तथा विश्वामित्रादावाचारनिमित्तमपि ब्राह्मण्यमस्ति शमो दमस्तपः शौचं सत्यमार्जव
मेव च । ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम् इति स्मृत्या तदुक्तेः । यत्त्वाचार्यैरनेन व
चनेन ब्राह्मणस्य शमादिर्विधीयते न ब्राह्मण्यस्य शमादिजन्यत्वं बोध्यत इत्युक्तं तन्न । पुरा
णविरोधापत्तेः । विश्वामित्रगोत्रोत्पन्ने ब्राह्मणत्वाभावप्रसक्तेश्च । मासेन शूद्रो भवति ब्रा
ह्मणः क्षीरविक्रयात् इत्यादिना शूद्रोत्पत्तिबोधनवदुक्तस्मृत्या ब्राह्मणत्वोत्पत्तिबोधने
बाधकाभावाच्च । तस्माद्ब्राह्मण्यजनकमिदम् ॥ ~~शमादिसमुच्चये च ब्राह्मणत्वोत्पत्ति~~
~~तस्माद्ब्राह्मणत्वजनकमिदम्~~ शमादिसमुच्चये च ब्राह्मणत्वोत्पत्तिरित्यतिनातिप्रस
क्तिः । यत्त्वाचार्यैर्मासेनेति वाक्यं कर्मनिन्दापरं कर्महानिप्रतिपादकं वेत्युक्तं तन्न प्रत्यया

श्री

(=लक्षण=)

र्थबाधापत्तेः निंघपयोविक्रयस्य फलाकांक्षायां प्रतितिष्ठंतीतिवद्यास्त्वेन भूजलोत्पत्तिप्रतिपा
दनेन निंदासंभवे मिथ्याभूतेन निंदाया उपयोगात्।। लाक्षालवणमांसानि पतनीयानि विक्रये।। पयो
दधि च मद्यं च हीनवर्णकराणि चेति याज्ञवल्क्यस्मृतौ पयोविक्रयस्य हीनवर्णकरत्वोक्तेः न तु शूद्रैकस्य
कर्महानिकरत्वरूपपतनीयत्ववैलक्षण्यस्य बाधापत्तेश्च। इदं च भूतं ब्राह्मणत्वाविरोधप्याप्त्यार्जित्याघभा
वार्थमिति वक्ष्यामः। तस्मात् धूम एवाग्नेर्दिवा ददृशे नार्चिरित्यादेः प्रत्यक्षविरोधः स्फुट एव। अतोर्थ
वादा न प्रमाणं किंतु तेषां मंत्रवत्प्रकरणात्तादङ्गत्वावगतेरदृष्टार्थः कर्मणि पाठः। यद्वा अक्रियात्म
नां प्रकरणे नाग्रहणात्साक्षात्सिद्धेरदृष्टार्थं तेषामध्ययनमिति पूर्वः पक्षः।। सिद्धांतस्तु अध्ययन
विधिना सर्ववेदाध्ययनस्य दृष्टार्थत्वावगमाद्विधिवदर्थवादैरपि दृष्टं प्रयोजनं कर्तव्यं।। न च शास्त्र
बोधं विनाप्यदृष्टं तैः कर्तुं शक्यं। तथा चाध्ययनविधिनैव तात्पर्यावगमात् शास्त्रे लक्षणा विधावपि

क्वचिदनन्यगत्या तदंगीकारान्न तादोषः शास्त्रस्य ज्ञानस्य च प्रवृत्तिजनकत्वमियं गौः क्रेया अपत्या अनव
द्यप्रजा बहुक्षीरा चेति वाक्ये दृष्टं। यात्तु शास्त्रस्य ज्ञानेऽप्य प्रवृत्तिः सा कारणांतरविरहात्। शास्त्रस्य च गुणा
तिशय आलितं क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीत्यादिरूपं अननुगतमेव क्षिप्रत्वादेर्यो च्यतेपि
कर्मणि तादृशदेवताकत्वादिबोधार्थं लक्षणा। शास्त्रस्य ज्ञानेन न च प्ररोचना द्वारा साधनेच्छा जन्यते॥
ज्ञानेच्छाप्रवृत्तीनां समानविषयत्वनियमेन तस्या आवश्यकत्वात्। प्ररोचनाच साधनेच्छाप्रतिबंधकव्यथा
यासानुसंधानरूपालस्यनाशः यद्वा प्ररोचना न नाशरूपा। व्यथायासीमत्वज्ञानस्य क्षणिकत्वेन स्वत ए दि
वनाशात्। किंतु पुनरुत्पत्तिप्रतिबंधः। वयं तु नाननुगतं शास्त्रस्य युक्तं। अननुगतत्वज्ञानानां प्रवृत्त्यावा
लस्यनाशो वा कारणत्वायोगात्। अतो बलवदनिष्टाननुबंधित्वमेव शास्त्रस्य तदेव च प्ररोचना तत् ज्ञानं चा
र्थवादैः क्रियते। तेन च बलवदनिष्टानुबंधित्वज्ञानाभावः सिध्यतीत्याचार्याशयः प्रवृत्तौ तु प्रतिबंधकाभा
वस्याकारणत्वात् बलवदनिष्टाननुबंधित्वज्ञानमेव प्रवर्त्तकं न बलवदनिष्टानुबंधित्वज्ञानाभावस्तत्रापि

५
भा०टि०

र्थवादैरेव तत्क्रियते न विधिना॥ अर्थवादानामप्रामाण्यापत्त्याऽनध्ययनप्रसंगात्॥ एतेन बलवदनिष्टाननुबं
धित्वमपि विधिवाच्यमिति निरस्तं तःपरास्ताः॥ कर्मणश्चानिष्टाननुबंधित्वं देयात् तत्फलस्यानिष्टाननुबंधित्वेन व्यथा
यासादिना च। उभयाभावश्चार्थवादबोध्यः॥ ननुमपायासादेः श्येनादिफलस्य च प्रसक्तानिषेधाभ्यामनि
ष्टाननुबंधित्वबोधात्कथं दुर्बलैरर्थवादैस्तदभावबोधः। उच्यते अयायासाद्यनिष्टबलवत्त्वाभावबोधना
त्। श्येनादौ चांगीकृतपापस्यैव प्रवृत्तेस्तज्जन्यानिष्टस्यैवाविषयत्वेनानिष्टत्वाभावात्॥ यद्वा बलवद
निष्टाननुबंधित्वभ्रमस्यापि प्रवृत्तिहेतुत्वात् तज्जनकत्वेन श्येनाद्यर्थवादानां प्रामाण्यं विध्यनुग्राहक
त्वाच्च वेदस्य भ्रमजनकत्वेपि न क्षतिः॥ न च यथापुर्वेष्वपि छेसादेर्मंत्रवद्देवतादिस्मारकत्वं। प्रकरणाधीत
तत्स्फोटकमंत्रवैयर्थ्यापत्तेः सर्वार्थवादेषु तदसंभवाच्च। अर्थवादजन्यप्राशस्त्यज्ञानं च कस्यचि
देव प्रवृत्तिजनकं तेन विनापि बहूनां प्रवृत्तिसिद्धेः॥ न चैवं येषां तेन विना प्रवृत्तिस्तान्प्रत्यर्थवादानामप्रामा
ण्यं स्यादिति वाच्यं। अगत्यंतरवाक्यस्यैवेष्टापत्तेः॥ न चैवं तेषामर्थवादाध्ययनं न स्यादिति वाच्यं।

५

9

नि

[illegible] अध्ययनकाले पुरुषविशेषानिर्णयात् लोके वलवद्विधौ चार्थवादकल्पनं तद्रूपे
ष्ट्रप्रत्ययात् तदुक्तमाचार्यैः। इह केचिद्विधिमात्रेण प्रतिपद्यते परे स्तुत्यर्थवादेनेति। यथा बलवदनिष्टानु
बन्धिचेष्टानमर्थवादैरेव कर्त्तव्यमिति यमोध्ययनविधिबलात्कल्प्यते। विधिबोध्यप्रवर्तनानियमवृत्त्ते
थाच्च सर्वान् प्रत्यर्थवादानां प्रामाण्यमिति क्रमः। यत्तूक्तं वपोत्खननाद्यर्थवादानां स्वार्थे प्रामाण्योक्तेः। अ
ग्नेः रोदनकृतेर्याच्ञाकरुद्रारुद्रवाच्यत्वाद्रोदनकृतत्वोक्तिर्गौणी। रजतस्य वा अश्रुगुणभुक्तरूपसादृश्या
दश्रुत्वोक्तिर्गौणी। रोदनप्रभवं रजतं ददतो गृहे न्नमापद्यत इति निन्दा। वपोत्खननार्थवादेऽपि जीवनहेतुत्वा
प्रजापतिर्वायुरात्मनो वपां व्यक्षिमुदखिदत् तथापि घृतेनोपाश्रिपच्यतोऽन्नं स्वरूपोऽजस्तुपरः समभवदिति गौणी
वपामात्रेऽप्यहोमे नापि फलजातं किमुत सर्वकर्मणीति स्तुतिः। वस्तुतस्त्वेवं युक्तः। एतादृशगौण्याः प्रमाणाभावा
त्तुतिबुद्धेरनुत्पत्तेश्च। अतो मिथ्याभूतमेवेदं स्तुत्यर्थमुच्यते। अत एव भाष्ये सदत्वाख्यानं स्तुत्यर्थेन प्रशं
सायां गम्यमानत्वादिति पक्षान्तरमुक्तं। बबरः प्रावाहणिरकामयतेत्यर्थवादे च नित्यसंयोगापात्तात् बंब
रशब्दानुकारी प्रवहतीति प्रावाहणिर्वायुरिति गौण्येव। ननु वायोरप्यनित्यत्वान्नतत्परिहारः। प्रवाहनि

न २

अ

त ४

६

भा०दि०

स्यत्वं तु बबरे पिव कुंरा क्यमिति किमर्थं शबरो नबरौ सत्तामाहेति चेत्। नावायुत्वस्य जातित्वेन सजातीय
प्रागभावसमव्याप्तिः सजातीयस्य ध्वंसकत्वरूपस्य प्रवाहनित्यत्वस्य वायोः संभवात्। कल्पत्वं तु ब्रस्मय
त्रिविधो गुणवादः संभवात्। काव्यत्वं च जातिरिति वैषम्यं। नैयायिकमते तु वेदकर्तुरीश्वरस्य नाविबद्ध
रद्धानान्त्रानित्यसंयोगो दोषः। अर्थवादानां च विध्येकवाक्यत्वं पदैकवाक्यता यान वाक्यैकवाक्यत
यास्वार्थपर्यवसितानां हिंसाभवति अंगविधीनामिव प्रधानविधिना। न चात्र विधिं विना स्वार्थपर्यव
सानं। अतएव भाष्ये पदे मीमांसाकाक्षत्वाद्विधेः स्तुत्यैकवाक्यत्वमित्युक्तमिति पितामहचरणाः।
वयं तु विधिं विनाप्यर्थवादानां स्वार्थपर्यवसानं। अन्यथोच्चैः ऋचा क्रियत इत्यादिविधावर्थ
वादानुरोधेन विधिभंगासिद्धेः। पदानामिति भाष्यमपि बहुवचनात् वाक्यपरं ज्ञेयमिति ब्रूमः।
माधवोप्येवमाह। अत एवेदानीं तनोऽर्थवादस्त्रिविधः। विरोधे गुणवादस्यादनुवादोऽवधारिते। भूता
र्थवादस्तद्धानादर्थवादो गौणोपी कृतः। यथा धूम एवाग्नेरित्यादेः प्रत्यक्षविरोधात्। तस्मादप्य
कंपुत्रेधनेन निरवत्साधयंतीत्यस्य उक्थस्य विशउद्गारः। सर्वं इष्याच्चयदरमिति ग्रस्त्रविरो
२ त्रिधामतः इति शांकरभाष्यात्। अस्यार्थः प्रमाणांतरेणार्थवादस्य विरोधे गुण २

६

11

धात्वाद्युच्चारणाय धनं दातुं नेच्छतीति गोपीनथाभाममयाद्वहवो दृष्ट इत्युपाख्यानमप्रमाणं भूतनिभार्यायाः
स्तत्वोभावेन स्पष्टत्वविरोधात्। अग्नेः इच्छस्यभक्तैकवराय प्रतिपादनाद्युक्ति विधिर्न बोधयति ह्ययामा
नदन्नविधिर्न बोधा। मायाकल्पितो हि त्वप्रतिभूतिर्दत्तेति गोपी प्रमाणान्तरेणार्थे निर्णीते नुवादो
यथा वायुर्वै क्षेपिष्ठेत्यादिः। तद्यानो प्रमाणान्तरेणाविरोधार्थनिर्णययोरभावे भूतार्थवादः सत्या
र्थता। यथा सोरोदीदित्यादि खेन सम्भिन्नं तत्त्वमेवेनमिन्द्र इत्यादीनां। हरिश्चन्द्रभारताद्युपाख्यानानां
च। एवमह ... प्रायेणारेत्यादिमन्त्रमंगलदेवतास्तुतेरपि स्वार्थसत्यत्वज्ञेयं। न चैवमान्ते यीसुव्रत
पेयाय त्रेइ स्तुतेरन्यावसमर्थत्वेनो ह स्यामान्यत्वरापत्तेः पाञ्चमिकसिद्धान्तोच्छेदः स्यादिति वाच्यं। स्तु
ते देवतासानन्तर्गतेः विशेषण प्रकारकत्वेन सवित्रादिपदवद्दृष्टार्थत्वोहस्यागयोरनापत्तेरि
त्याहुः। मीमांसकास्तु मन्त्रार्थवादानां स्वार्थसत्यत्वे स्तुतो च तात्पर्ये प्रावृत्तिरुद्धरणावोस्यमेद स्यात्। न च
तत्तद्वाक्यार्थस्य सत्यत्वं विना स्तुत्यनुपपत्तिः। इच्छोद्दे ... भ्यामित्यादिवेदे लोके चासत्येनाप्यर्थेन स्तुत्यं

स्ता०

६२

७
भा०दि०

गीकारात्। न च यथा प्रतितिष्ठंतीत्यत्र सत्येन प्रतिष्ठाफलेन स्तुतिसंभवे ऽसत्येन स्तुत्ययोगात् प्रति
ष्ठायाः फलं संकल्प्यते। तथा सत्येनाग्निरोदनादिना स्तुतिसंभवे ऽसत्येन तद्योगात् भूतार्थता कल्प्य
तेति वाच्यं। अग्निरोदनादेः सत्त्वे वेदस्यादिमत्त्वदोषापत्तेः। प्रतिष्ठायास्तु फलत्वे तदनापत्तेर्वैषम्या
त्। छागस्य वपायाः प्रतितिष्ठंसु परिहि हिदेवेभ्य इत्यादीनां तु विध्यपेक्षितार्थप्रतिपादकत्वात् स्वार्थसत्य
त्वमिति वैषम्यं। अतो न प्रमाणान्तराविरोधमात्रेण स्वार्थसत्यत्वमित्याहुः॥ यत्तु सोमेश्वरेण शेषेप्रो
क्षणवद् इति सूत्रव्याख्याने सत्यं ज्ञानमनंतं ब्रह्मेत्यादेर्भूतार्थवादत्वमुक्तं॥ तत्तु श्रवणादिविध्युपयो
गात्। अतः प्रभुसंमितोपदेशरूपविधिवदर्थवादानामपि निवारणाविषयनिदृशात्त्वजनकत्वेन प्रामा
ण्यं॥ ननु का प्रेरणा निवारणा च। उच्यते। यथोदयनमते ग्रामानयेत्यादि गुरूपदेशो गुरूर्मां प्रवर्त्तयती
ति बोधात् गु[illegible]रोरिच्छा लिङादिभिरभिधीयते। वेदे चेश्वरेच्छा। तथास्मन्मते प्रवर्त्तकं वेदस्याकर्तृकत्वे
न तदसंभवात् लिङादिनिष्ठः कश्चिद्धर्मोस्तीति कल्प्यते। स चार्थभावनाभिधानानुकूला शक्तिरेव। स्वतंत्र

७

13

पदार्थकल्पने प्रमाणाभावात् सैव च प्रेरणेत्युच्यते। सा च लिङादेः प्रवर्तकव्यापारत्वेन ज्ञाता प्रवर्तिका न शक्ति
त्वेनेति प्रवर्त्तनात्वेनाभिधेया। तस्याश्चार्थभावनाप्रवृत्तिरूपा फलं प्राशस्त्यज्ञानमिति कर्त्तव्यता प्रेरणाज्ञानं
करणं तेन प्रवृत्तसुसत्तेः फलोद्देशप्रवृत्तकर्तृव्यापारेण फलजनने उपकार्यत्वरूपस्य करणलक्षणस्य त
त्र सत्त्वाच्च तथाहि॥ फलं प्रवृत्तिस्तत्कर्ता लिङ् तस्य व्यापारः लिङ् मां प्रवर्तयतीति तन्निष्ठप्रवर्तकत्वस्य
ज्ञानं। प्रवर्तकत्वं च प्रेरणाख्यशक्त्यभिन्नो नानुकूलशक्तिमत्त्वं तत्ज्ञानं च शक्तिज्ञानं तयाति
शेभिधासैव चेत् शब्दभावनाभाव्या च तस्याः पुरुषप्रवृत्तिः। संबंधबोधः करणं तदीयप्ररोचना
योगतयोपयुज्यत इति श्लोकस्थः संबंधशब्दोपि प्रेरणाया लिङर्थभावनासंबंधरूपत्वेनोपपन्न
इति सोमेश्वरः। स च विधिसमभिव्याहृतनञो निवर्तनात्वेनोच्यते। वाचकतासंबंधेन चाभाव
स्य शब्दधर्मत्वमिति भाष्यकारः। वार्तिके तु नञ्समभिव्याहृतविधिना प्रेरणाऽऽख्यशक्तिरेव नि
वर्तनात्वेनोच्यत इति पक्षान्तरमुक्तं। अत्राचार्यैर्न ब्राह्मणं हन्यादित्यादौ यो ब्राह्मणस्तं न हन्या
त्। यत् ब्राह्मणहननं तन्न कुर्यात्। यत् ब्राह्मणहननं कुर्यात् तन्नेति वाक्यार्थत्रयं दर्शितं। एतच्च स्म

८

तिच्चरणो विवरिष्यामः। गुरुमते तु कृतिसाध्यत्वविशिष्टं कृतिसाध्यं लिङर्थः। तच्च वेदे पूर्वं। कालांतरीय
स्वर्गादिकामस्य क्षणिके यागे नियोज्यत्वासंभवात्। लोके तु कृतिसाध्यत्वमात्रे लिङो लाक्षणिकः। विशे
ष्यस्य पाकघटादेः पदांतरेणाभिधानात्। निषेधे तु निषेध्याभावविषयकमपूर्वमेव भासते नं निवारणे
त्यलं पल्लवितेन। ननु अर्थवादादिप्रामाण्यं अध्ययनविधिदृष्टार्थत्वाधीनं तच्चासिद्धमिति चेत्। उच्यते। स्वा
ध्यायोऽध्येतव्य इत्यनेन गुरुमुखोच्चारणानूच्चारणरूपाध्ययनविशिष्टभावना विधीयते। तत्र भाव्या
कांक्षायां न स्वर्गः साध्यः। अदृष्टार्थत्वापत्तेः। नाप्यक्षरग्रहणादिवक्ष्यमाणकार्यपरंपरयापूर्व
दूषणापरिहारात्। नह्यग्निहोत्रादिहोमस्याहवनीयसंयोगभस्मसाङ्गादिद्वारा स्वर्गजनकत्वेकल्प्य
मानेऽदृष्टकल्पनापैति। नाप्यध्ययनं भाव्यं। तस्य समानपदोपात्तत्वेन शीघ्रोपस्थितावपि पुरुषार्थत्वाभा
वेन समानप्रत्ययोपात्तप्रेरणाबाधापत्तेः। ततः समानपदोपात्तत्वाद्बाधकाभावाच्चाध्ययनं करणमिति
निर्णीतेऽध्ययनजन्यकार्यपरंपरायामक्षरावाप्तिपदज्ञानपदार्थज्ञानवाक्यार्थज्ञानकर्मानुष्ठानतत्

८

ना

लान्युपस्थितानि। तत्र पूर्वापरकार्याणि विहाय मध्यस्थस्यार्थज्ञानस्यैव भाव्यता कल्प्यते अनुष्ठा
नद्वारा आसन्नपुरुषार्थत्वात्। लोके वाक्याध्ययनस्य वाक्यार्थज्ञानार्थत्वदर्शनाच्च। न चाक्षरावा
प्तेर्ब्रह्मयज्ञपारायणरूपपुरुषार्थानुबंधित्वात् तदध्ययनेन वेदस्यार्थकर्मत्वोक्तेः स्वाध्ययनभाव्य
त्वमस्त्विति वाच्यं। वेदाध्ययनस्य वेदबोध्यसकलकर्मार्थत्वे संभवति कर्मद्वयप्रकरणाभावेन तन्मा
त्रार्थत्वासंभवात्। किं चाक्षरावाप्तेर्भाव्यत्वे गुरूपदेशादिनाप्यर्थज्ञानकरणापत्तिः। किं च कर्मविधि
भिः स्वार्थानुष्ठानार्थार्थज्ञानमेवाक्षिप्यते। नाक्षरावाप्तिः तां विनाप्यनुष्ठानसिद्धेः किं चानन्यथासिद्धभा
व्यत्वपुरुषार्थानुबंधित्वस्य भाव्यताप्रयोजकत्वात्। यथा चरुमुपदधातीत्यत्रोपधीयमानचरुत्वा
त्वाध्ययनदेशस्थितिरूपदृष्टसंस्कारजनकत्वं विनोपधानस्य नरूपलनिर्वर्तकत्वमिति चरुत्वान्मा
भाव्यत्वस्यान्यथासिद्धत्वान्न वाक्यार्थभाव्यत्वेनान्वयो यथा वाध्वर्युं वृणीत इत्यत्र वरणस्याध्वर्युनिति
रूपदृष्टसंस्कारजनकत्वं विनानकृतूपकारकत्वमित्यध्वर्योर्भाव्यत्वस्यान्यथासिद्धत्वान्न वाक्यार्थभाव्य

१
भा०दि०

त्वेनान्वयस्तथाध्ययनस्य स्वाध्यायावाप्तिरूपदृष्टसंस्कारजनकत्वं विनान्वाक्यार्थज्ञानजनकत्वमित्साम
र्थ्यत्वस्यान्यथासिद्धत्वान्न वाक्यार्थे भाष्यत्वेनान्वयः। तव्यप्रत्ययश्च द्वारत्वेनैव कर्मत्वं विधत्त इति सोमे
श्वरः। आर्थकर्मत्वानुवाद इति पार्थसारथिः। अतः स्वाध्यायावाप्तिद्वाराध्ययनेनार्थज्ञानं भावयेदिति
व वाक्यार्थः। न चार्थज्ञानजन्यानुष्ठानस्यैव अध्ययनभाव्यत्वमस्त्विति वाच्यं। लोके वाक्याध्ययनस्य
वाक्यार्थज्ञाने करणत्वदर्शनात्तेनान्यथासिद्धेः। न चैवं पदज्ञानस्य पदार्थज्ञानस्यैवाक्यार्थज्ञानादृष्ट्याध्य
साज्ञाव्यत्वं भवत्विति वाच्यं। पदे वेदत्वाभावेन तयोर्वेदजन्यत्वायोगात्। किंचाध्ययनशब्दोऽर्थज्ञानफलके
व्यापारे रूढो नानुच्चारणमात्रे। अर्थज्ञानरहितशास्त्रश्रवणे शास्त्रमधीतमिति प्रयोगाभावात्॥ ननु
विध्यंतरेणार्थज्ञानस्य क्रत्वंगत्वानवगतेर्न तस्य भाव्यत्वं युक्तं। न च तस्य लिंगात् क्रत्वंगत्वं तस्य सामा
न्यसंबंधकारिप्रमाणसापेक्षत्वात् इति चेन्न। सामान्यसंबंधकारिप्रमाणस्य क्रतुसंबंधबोधकत्वा
दर्थज्ञानस्य क्रतुजनकत्वेनैव क्रतुसंबंधसिद्धेस्तदनपेक्षत्वात्। न चार्थज्ञानस्य लिंगकल्प्यांगत्वबोध

वा

५

17

ॐ

क्रविधेरपूर्वपरिसंख्याविधित्वासंभवादर्थज्ञानस्य नांगतेतिवाच्यं।नियतोपकारकस्यविधिंविनाप्यं
गत्वबोधादितिपार्थसारथिसोमेश्वरौ।वयंतुतन्नियं।तृतीयेध्यायेंगत्वस्यविधिबोध्यत्वसाधनेनवि
धिंविनार्थज्ञानस्यक्रत्वंगतायोगात्।अन्यथाफलेछायाअपिक्रत्वंगतापत्तेः।किंचार्थज्ञानस्यक्र
त्वंगत्वांगिकारेपर्णतायाः क्रत्वंगजुहूर्थत्वेनक्रत्वंगत्ववदध्ययनस्यफलाश्रवणात्क्रत्वंगार्थज्ञा
नोर्थत्वेनक्रत्वंगतास्यात्।नचैवमाधानस्यक्रत्वंगत्वप्रसक्तिः।आधानविधिकालेनसोऽहवनी
यादेःक्रत्वंगत्वोत्तानेनवैषम्यात्।आहवनीयादेरदृष्टरूपत्वेनाधानस्यतत्स्वरूपार्थत्वेवैयर्थ्या
नापाताच्च।नचार्थज्ञानस्यक्रत्वर्थत्वेपिनतदर्थाध्ययनस्यक्रत्वंगत्वं।अभिक्रमणस्यप्रयाजांग
गत्वेपिप्रधानांगाभावादितिवाच्यं।अभिक्रमणस्यावांतरप्रकरणेनप्रयाजापूर्वार्थत्वादेय्य
र्थ्यानापातेनवैषम्यात्।नचपर्णताविधौजुहूपदस्यश्रुतत्वेनापूर्वसाधनलक्षणयापर्णतायाः
क्रत्वर्थत्वं।अध्ययनविधौत्वर्थज्ञानपदस्याश्रुतत्वेनापूर्वसाधनलक्षणायाअसंभवा[illegible]ध्य
यनस्यक्रत्वंगतापत्तिरितिवाच्यं।अर्थज्ञानंभावयेदितिशाब्दकल्पनस्यावश्यकत्वेनश्रुतत्वाश्रु

ध्या५

ली

ना२

18

१०
मा०मि०

नत्वयोरप्रयोजकत्वात्। अतोर्थज्ञानस्य विध्यभावान्न क्रत्वंगता। यदपि सोमेश्वरेण यदेव विद्यया
करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति वाक्यादर्थज्ञानस्य क्रत्वंगतेति पक्षांतरमुक्तं तद
पि तुच्छं। विधित्रयासंभवात्। न चार्थज्ञानसामान्यस्य प्राप्तावप्यध्ययनजन्यार्थज्ञानविशेषस्य नि
यमेनाप्राप्तेरनेन वाक्येन विधिरस्त्विति वाच्यं। निर्मथ्येनेष्टकाः पचंतीत्यत्राग्नेः पाके नियमेन प्रा
प्तेः फलतो मथनविधानवदत्राप्यर्थज्ञानस्य नियमेन प्राप्तेः फलतोध्ययनजन्यत्वस्यैव विधाना
पत्त्यार्थज्ञानस्याविधेयत्वात्। तस्मादस्य वाक्यस्योपनिषत्सु पाठादोमित्युद्गीथमुपासीतेत्यादिवा
क्यविहितोपासनारूपविद्यया यत्फलं करोति तत्कर्म तत्फलतोधिकमित्यर्थः। महामुद्गलभट्टा
अप्येवमाहुः। अतोर्थज्ञानस्यांगत्वाभावेपि कर्मोपकारकत्वमात्रेणार्थज्ञानायाध्ययनविधा
नं। न चाध्ययनजन्यार्थज्ञानाभावे कर्मणः फलाजनकत्वेध्ययनस्य कर्मांगत्वं स्यादिति वाच्यं।
अध्ययनस्य कर्माधिकारविशेषणार्थज्ञानार्थत्वेनांगत्वानापत्तेः। अन्यथा फलेच्छावच्चक्षुरा

१०

देरप्यधिकारिविशेषणस्यक्रत्वंगत्वापत्तेः॥राजसूयादौतुराजत्वादेरधिकारिविशेषणस्यवि
हितत्वादंगत्वमितिवैषम्यं॥ज्ञात्वाकर्माणिकुर्वीतघटंगोवेदोऽध्येयोज्ञेयश्चयोऽर्थज्ञइत्सकलंभद्रमश्नु
तेनाकमेतिज्ञानविधूतपाप्मास्थाणुरयंभारहारःकिलाभूदधीत्यवेदंनविजानातियोऽर्थं॥ छंदांस्ये
नंमृत्युकालेसर्जंतिनीडंश्वाकुंताइवजातपक्षाःइत्यादिस्मृतयश्चाध्ययनविधिमूलाः॥अर्थज्ञान
स्यचपुत्रपश्वादिवत्फलत्वाद्यत्तुतंत्ररत्नेदर्भमार्जनाधिकरणेऽध्ययनमाधानवन्नक्रत्वर्थंनापिपुरुषा
र्थमितिसुक्तं॥तदध्ययनस्यसाक्षात्पुरुषार्थतानास्तीतिव्याख्येयमितिवक्ष्यामः॥नचार्थज्ञानस्यभाव्यत्वे
वटोरध्ययनात्पूर्वंसंध्यावंदनादिफलंनस्यात्इतिवाच्यं॥पावमानेष्ट्याहवनीयाग्निहोत्रहवण्योरिव
तत्राध्ययनानपेक्षणात्॥नन्वज्ञातेज्ञातेवावेदार्थेतत्वादेवकामनानुदयान्नार्थज्ञानस्यभाव्यत्वमिति
चेन्न॥वेदाध्ययनकालेऽप्राप्ततत्तोवेदार्थज्ञानोत्तरंतात्विकब्रह्मज्ञानेदृष्टतात्विकार्थज्ञानेकामनोदयसं
भवात्॥नन्वर्थज्ञानस्यभाव्यत्वेब्रह्मविचारोपिब्रह्मचर्यएवस्यात्ननतस्यविरक्ताधिकारिकत्वात्॥

इति चेत्

११
भा०दि०प्र०

ति य

यत्तुदीक्षिताः नार्थज्ञानं माध्यं। निषेधवाक्येष्वर्थज्ञानोपायनियमासंभवात्। तथा हि। यदि तावदध्ययना-
प्तवेदवाक्यार्थज्ञानवतामेव विहितकर्मणः फलोत्पत्तिरितिवदध्ययनाप्तनिषेधवाक्यार्थज्ञानवतामेव नि-
षिद्धानुष्ठानं प्रत्यवायायैकल्प्यते। तर्हि अध्ययनरहितानां निषिद्धानुष्ठानेपि प्रत्यवायपरिहारः स्यात्।
निषिद्धे च प्रवृत्तिः स्यात्। अथोपायांतरेण निषेधवाक्यार्थं जानन् प्रत्यवेयादिति नियम उच्यते। तर्हि अ-
ध्ययनरहितानां निषिद्धवर्ज्जनार्थमुपायांतरेण ज्ञानेपि प्रत्यवायः अज्ञानेपि निषिद्धानुष्ठानप्रसक्त्या प्र-
त्यवाय इति संकटं स्यात्॥ यत्तु पार्थसारथिः अध्ययनाप्तसकलवेदार्थज्ञानवतामेवानुष्ठानमभ्युदया-
येति नाध्ययननियमफलं। किंतु कर्मसु शूद्रानधिकारसिद्धिः कर्मविधयो हि अध्ययनविधेरर्थज्ञान-
फलकत्वे तस्य त्रैवर्णिकविषयत्वसिद्धविधानात् त्रैवर्णिकानधिकुर्वाणाः न शूद्रस्य तमाक्षिपंति त-
दभावेन ज्ञानवंतमपि कुर्युरित्याहा तन्न। अध्ययनविधिना स्वशाखामात्राध्ययनविधानेपि कर्म-
णां शाखांतरीयमंत्राध्ययनाक्षेपकत्ववत् ज्ञानाक्षेपकत्वप्रसक्तेः। न च शूद्रस्य काम्येन ज्ञानमात्रे

११

प्यते त्रैवर्णिकानामस्मिन्निति न शूद्राधिकार इति वाच्यं। अप्रयोजकत्वात्। अन्यथा भूयस्त्वेनो भ
यश्रुतीति न्यायेन यस्याः शाखायां बहूंगविधानं तत्र कर्मविधानेन तच्छाखीयस्यैवाधिकारः स्या
त्। तस्माच्छूद्रानधिकारे वेदतदर्थग्रहणयज्ञानुष्ठाननिषेध एव हेतुः। अथ उच्चैः ऋचा क्रियत इत्या
दिवाक्यानां तत्र तत्रार्थे तात्पर्यसिध्यर्थं लक्षणादि कल्प्यते। तासेयावगतिश्च वेदेनान्यतः संभवतीत्य
ध्ययनविधेरर्थज्ञानार्थत्वमिति समभिमतं। तन्न। वाक्यानामर्थपरत्वस्य लोकसिद्धत्वेनार्थज्ञानस्य वैधफ
लत्वायोगात्। न्यायाल्लक्षणादिसिद्धेश्च। अथ पांचमिकपाठक्रमादिसिध्यर्थं अध्ययनेन यज्ञा
वयितुं शक्यं तज्ज्ञापयेदिति वाक्यार्थस्यावरूपकत्वादर्थज्ञानस्य वैधफलत्वमिति समभिमतं तदपि न। क्रम
ज्ञानस्यास्मरणाद्यनुनिष्पादिवाक्यार्थज्ञानजन्मतयाध्ययनविधेः फलत्वाभावात्। अथ व्याकरणा
दीनां पदार्थज्ञानोपायानामंगसमाख्याबुद्धांगत्वानुपपत्त्याध्ययनस्यार्थज्ञानफलकत्वमकिंचि
त्करस्यांगत्वायोगादिसमभिमतं तदपि न। अध्ययनात्तवेदस्यार्थज्ञानार्थत्वेन समाख्याप्रपन्नावर्थज्ञा

३२
भा० प्र० ६०

नस्य वैधफलत्वायोगात्। अर्थाङ्गाध्ययनविधेरर्थज्ञानफलकत्वमावश्यकं। अन्यथा वेदाङ्गा
निर्वाहात्। तथा च वेदाध्ययनमपि तत्फलकमस्त्विति समिमतं तदपि न। अङ्गाध्ययनविधेः प्रयाजन्या
येनेति प्रातिपदिकानुसारेण तृतीयाबाधवदङ्गानीति प्रातिपदिके न द्वितीयावगतप्राधान्यबाधेऽप्य
ध्ययनविधौ तद्बाधे मानाभावात्। तस्मादक्षरावाप्तिरेव फलं। नन्वर्थज्ञानस्य वैधफलत्वाभावे स्नाना
त्पूर्वकर्मविचारो न स्यात् न च स्नानोत्तरकर्त्तव्यदारपरिग्रहाधानादिना तदाक्षेपः। अधीत्य स्नायादिति
श्रुतेर्बलीयस्त्वादिति चेन्न। प्रमाणबलाबलात्प्रमेयबलाबलस्य ज्यायस्त्वात् लिङ्गस्य पदार्थधर्मक्र
मबोधकश्रुतितो बलीयस्त्वात् विचारस्य पूर्वकर्त्तव्यतासिद्धेः। वेदाध्ययनसंस्कृतस्य वेदस्य भाव्यु
पयोगापेक्षणात् क्रतूनां चार्थज्ञानोपायापेक्षत्वात्तत्सिद्धेश्च। यथा चार्थवादादिषु सक्तूनान्यैः स्तु
साधयगतिरिति कल्प्यते। तथाध्ययनात्तवेदेऽर्थज्ञानोपायेन ज्ञानं कर्त्तव्यमिति विकल्प्यते
नन्वध्ययनसंस्कृतस्य ब्रह्मयज्ञादौ विनियोगे न संस्कारविधेः कृतार्थत्वान्न वेदस्यार्थज्ञानार्थता

३२

23

युक्ता अन्यथा स्फ्येनोद्धंतीत्यादिविनियोगेपि तत्संस्कारप्रोक्षणादिविधिबलादन्यत्रापि विनियोगः स्यादिति
चेन्न तत्र संस्कारविध्येः स्फ्येनोद्धंतीत्यादिनैकवाक्यत्वादन्याविनियोगः। ब्रह्मयज्ञादौ तु नाध्ययनविधिशेषो
वेदो विनियुक्तः। एकवाक्यत्वाभावात्। संस्कारविध्यन्यथानुपपत्त्यात्कल्प्यं न चार्थज्ञानेप्यविधिशेषः। न च ब्रह्म-
यज्ञादौ विधिशेषत्वविनियोगाभावेपि विशेष्यविनियोगोस्ति अर्थज्ञाने तु सोपि नास्तीति विशेषः शंकनीयः
अप्रयोजनकत्वात्। अत एव दाद्रो आधानसंस्कारविध्यन्यथानुपपत्त्याहवनीयादेर्लौकिकपाकादि-
षु विनियोगः पूर्वपक्षितः। न च तत्र स सिद्धांतयुक्त्यैव वेदस्यार्थज्ञानार्थतापि भविष्यतीति वाच्यं तत्र सं-
स्कृताग्निवाचको हवनीयशब्देनाहवनीयादेर्होमादौ विनियोगात्संस्कारविधेर्नैराकांक्ष्यवदध्ययनविधि-
शेषस्य वेदस्य ब्रह्मयज्ञे विनियोगाभावेन तत्र स सिद्धांतयुक्त्यसंभवात्। अस्तु वा वेदस्य ब्रह्मयज्ञादौ विनियो-
गेनाकांक्षाशांतिस्तथापि तत्र क्रत्वपेक्षितार्थज्ञानाय पुनराकांक्षोत्थानं यथा ज्योतिष्टोमप्रकरणपठिता-
या आग्नेय्या ऋचः स्तोत्रविनियोगेन निराकांक्षाया अप्याग्नेय्याग्नीध्रमुपतिष्ठत इति पुनर्वचनाद्वि-
नियोगे न तदुत्थानं। यथा प्रकृत्यर्थतेन निराकांक्षाणामंगानां विकृत्याकांक्षया पुनराकांक्षोत्थानं। यद्वा

९३

स्थाणुरयंभारवाहः किलाभूदधीत्यवेदंनविजानातियोर्थमित्यादिवाक्येनवेदस्यार्थज्ञानेविनियो
गः। अथवावेदांगानांव्याकरणादीनामंगत्वानुपपत्त्यावेदस्यार्थज्ञानार्थतासिध्यतीत्याहुः। तन्नतथा
हियत्तावदुक्तंनिषेधेषुनाध्ययनजन्यार्थज्ञाननियमः संभवतीतितन्नयथाप्रतिग्रहार्जितेनेवद्रव्ये
णवैदिकलौकिककर्माणिकुर्यादितिनियमस्यवैदिककर्मण्यतिक्रमेतत्फलाभावोलौकिककर्मण्यति
क्रमेचप्रत्यवायःकल्प्यतेतथाध्ययनेनैवविहितनिषिद्धकर्मज्ञानंकुर्यादितिनियमस्यविहितकर्म
ण्यतिक्रमेतत्फलाभावोनिषिद्धकर्मण्यतिक्रमेचप्रत्यवायःकल्प्यते। तत्फलाभावस्यानिष्टत्वाभावात्।
अतएवषष्ठेभाष्यकारेणशूद्रस्याध्ययननिषेधातिक्रमेकर्मफलाभावःप्रत्यवायश्चेत्युक्तं। नचोक्तसं
कटापत्तिः। अत्यह्नादव्युत्तरसंक्रमनिमित्तप्रधानस्नानदानातिक्रमजन्यबहुदोषपरिहारायव्रतांग
पारणाकालातिक्रमजन्याल्पदोषांगीकारवत्। उपायांतरेणज्ञानेप्रत्यवायाल्पत्वेननिषिद्धानुष्ठानेच
प्रत्यवायाधिक्येनोपायांतरज्ञानस्यकर्तुमुचितत्वात्। यदप्युक्तंलिंगेनअधीत्यस्नायादितिश्रौतक्रम
स्यबाधइतितन्न। लिंगेनश्रुतेरत्यंतबाधायोगात्। वेदंकृत्वाचेदंकरोतीतिश्रुतेस्तुक्षुद्रनावविषयत्वे

९३

25

नाप्युपपत्ते नात्यंतबाध इति वैषम्यं।यच्चोक्तमर्थज्ञानस्य वेधफलत्वाभावेपि वेदस्याध्ययनसंस्कारवै
यर्थ्यापत्तेरर्थज्ञानार्थत्वनियमासिद्धिरिति तन्न।विधिं विना तन्नियमासिद्धेः।अन्यथा सोमस्याभिषवा
दिसंस्कारवैयर्थ्यापत्त्या यागार्थत्वसिद्धेः सोमविधिवैयर्थ्यापत्तेः।यदपि आहवनीयादेः पाकादौ विनियोगः
पूर्वपक्षित इत्युक्तं।तत्र पूर्वस्मृतेरध्ययनाव पक्षस्य हेत्वाभासमूलकत्वेन दुर्बलत्वेप्यक्षतेः।यदप्या
ग्नेय्या आग्नीध्रमुपतिष्ठत इतिवत्सु तराकांक्षोत्थानमित्युक्तं।तन्न।एतस्मृतेरध्ययनविधिमूलकत्व
संभवे मूलांतरकल्पने गौरवात्।यच्चोक्तमंगानामंगत्वानुपपत्त्या वेदस्यार्थज्ञानार्थतेति तन्न।अंग
त्वानुपपत्त्याध्ययनविधेर्वार्थज्ञानफलकत्वकल्पनस्य न्याय्यत्वादिति दिक्।तस्मादर्थज्ञानमेव भाव्यं।
तच्चात्र विधेर्विध्यंशेनुष्ठेयज्ञानं।अर्थवादांशे प्राशस्त्यज्ञानं।मंत्रांशे चाविहितार्थस्मृतिः।स्तोमांशेपि
सामकालपूर्तिजन्यगेक्षराभिव्यक्तिद्वारकं गुणगुप्तिसंबंधरूपमर्थस्मरणमेव।यत्तु विधिमंत्रक्रमास
दर्थक्रमासिद्धिरध्ययनविधेः प्रयोजनमिति पंचमे वक्ष्यते।तदर्थज्ञानानुषंगिन स्वतंत्रं प्रयोजनं अनु
ष्ठेयादिज्ञानानां च सकलानुगतार्थज्ञानत्वेन भाव्यता।तेन भाव्यतावच्छेदकाननुगमः प्रत्युक्तः।अध्य

प्रकीज्ञान २

४ सर्ववेदाध्ययनमपिनावश्यकमित्याचार्याभिप्रायंवर्णयंति।। वस्तुतस्तु ४

३४

यन विधिश्च काम्योपि फलतो नित्यः प्रधानवदुत्तरक्रतूनां नित्यत्वात्। अर्थज्ञानं च शाखाध्ययनोत्तरं क-
र्तव्यं। अथातो धर्मजिज्ञासेत्यत्राथशब्दस्य तथाव्याख्यानादिति जैमिनीयाः। वस्तुतस्तु तत्तद्वाक्याध्ययनो-
त्तरमर्थज्ञानं च नावश्यकं। आवश्यककर्ममात्रज्ञानेन चारितार्थ्यात्। अतएव वक्ष्यति यादेवैश्यस्तोमभा-
गार्थज्ञानं नावश्यकमित्याचार्याः। केचित्तु सर्ववेदाध्ययनमावश्यकं ब्रह्मयज्ञाद्यर्थं तस्यावश्यकत्वात्
स्वाध्यायविधिश्च स्वस्याध्ययनं विधत्ते न चैकस्याध्येयत्वमध्यापकत्वं च विरुद्धमिति वाच्यं। अध्यय-
नविधित्वेनाध्यापकत्वस्य स्वाध्यायत्वेन चाध्येयत्वस्यैकस्मिन्नविरोधात् स्वाध्यायशब्देन च स्वस्या-
ध्याय इति व्युत्पत्त्या स्वेषामध्याय इति वा व्युत्पत्त्या पितृपितामहाद्यधीतशाखोक्तेरध्ययनविधिरेकस्या
एव शाखाया अध्ययनं विधत्ते उपादेयगतस्यैकत्वस्य विवक्षितत्वात्। यद्वा स्वाध्यायपदेन वशाखैक्य-
लाभादेकवचनमनुवादः। तथा च वेदानधीत्य वेदौ वा वेदं वापि यथाक्रममिति स्मृतेर्नाध्ययनवि-
धिमूलं किंतु वचनांतरं। एकशाखाध्ययनपक्षेपि यजमानस्य स्वशाखापरशाखास्थयाजमा-
नज्ञानमेवावश्यकं नाध्वर्यवादिज्ञानं। अध्वर्युप्रादाने नानुष्ठानसिद्धेरिति। प्रयोजनं पूर्वपक्षे

२४

ऽर्थवादानामहृदयार्थः पाठ-अर्थवादिकफलकत्वेन संदिग्धार्थनिर्णयाय सिद्धिश्च सिद्धान्ते वैपरीत्य
मिति। विधिशेषस्याद् पूर्ववादमात्रस्यानर्थकं। एवाधिकरणेऽर्थवादानामानर्थक्यनिराकरणेन शास्त्रस्य
परत्वमुक्तं। इदानीमधिकरणद्वयेन केषांचिदर्थवादानां फलादिप्रतिपादकत्वनिराकरणेन तत्परत्व
मुच्यते। सोमापौष्णं पशुं औदुंबरो यूपो भवत्यूर्ग्वा उदुंबर इत्यादि फलसमर्पकमुतार्थवाद इति। तत्रउदु
ऽर्गेवावरुन्ध्या इति तादर्थ्यं च चतुर्थ्याः सत्यां स्वरूपे पशुफलार्थत्वसंभवे लाक्षणिकत्वबाधकत्वायोगादप
लार्थमौदुंबरताविधिः। ऊर्ग्वा उदुंबर इत्यादि चेदूर्जोऽवरुध्या इत्यस्योपपत्तिः। न च घटो भवतीतिवदुदुं
बरो भवतीत्यत्रौदुंबरताभवनाश्रितायां भावनायां औदुंबरतैव भाव्या स्यान्नोर्गवरोध इति वाच्यं। औ
प्राप्तौदुंबरताया विधेयत्वेन भाव्यत्वायोगात्। न च कामशब्दाभावान्नोर्गवरोधस्य फलत्वमिति वाच्यं। तत्रा प
लं धार्यते येनैव कामशब्देनोच्यत इति भावार्थाधिकरणवार्त्तिके कामशब्दानावश्यकत्वोक्तेः। यत्तु तत्र सोमे
श्वरेण कामपदं विना फलस्याभवनकल्पनानुपपत्तिः प्रायेणास्यापि विवक्षितमिति सुवचनत्वयुक्तं कामपदस्य

भि २

९५

नवनकर्तृत्वे शास्त्रस्य भावात्। आधानवाक्ये नीनां कामपदं विनापि भाव्यस्यावगमाच्चेति पूर्वपक्षः। सिद्धांतस्तु नात्र गु
णफलसंबंधविधिः संभवति आश्रयालाभात्। यो हि पशुयागः संनिहितः स नाश्रयत्वाय योग्यः। यत्र हि गुणः का
रकतामापद्यते स आश्रयः। यथा होमो दध्नः प्रणयनं च गोदोहनस्य। न चौदुम्बरता पशुयागे कारकं संभवति।
न चानर्थक्यात्तदंगे क्षितिन्यायेन यूपद्वारा तस्याश्रयत्वाय। यः प्रधानोपकारित्वेन श्रूयते स तदंगेपि स्थितः प्र
धानस्योपकरोति। यथा सप्तदशारत्निर्वाजपेयस्य यूप इति वाजपेयांगत्वेन श्रुतं सप्तदशारत्नित्वं यूपद्वारा वाज
पेयस्य गुणफलसंबंधे तु गुणः प्रधानमिति नयांगांगत्वं भजते। यत्तु पशुनियोजनेन यूपद्वारेणाश्रयत्वयोग्यं तद
पि सहयूपेनानुपस्थितं सोमापोक्तस्याधिकृतिसात्। न च पशुलिवच्छेदेन तस्योपस्थितिः स हि प्राकृतपदार्थ
जन्यमुपकारं सामान्येनोपस्थापयति तु पकारपौर्वापर्यकभावेन तूपस्थितिर्जुह्वादीनामप्यस्तीति तेषामप्याश्रय
त्वं स्यात्। तत्र च यूपग्रहणानर्थक्यं। वाक्येन च तस्याश्रयत्वेधाप्यभेदः। अतो विकृतौ प्राकृताश्रयेण गुणफलसं
बंधं कुर्यापि नास्तीति सिद्धांतः। न च पर्णमय्यधिकरणमेतदधिकरणे गतार्थमिति वाच्यं। पर्णतादेरनारभ्याधीत
त्वेन प्रकृतिनिवेशस्यावश्यकत्वेनाश्रयलाभात् पर्णतागुणस्य फलसंबंधविधानसंभवती त्याधिकाशंकायाम्भ

९५

29

तुर्थेन निरासात्। अप्रकृतितश्च सूपे बिल्वखादिरत्वप्राप्तेरौदुंबरत्वस्य नियमासंभवादयमपूर्वविधिः। गुरुमते तु दध्ने
द्रियकामस्य जुहुयादिति दध्नो होमविधिनापक्षे दध्नो या सूपाद्दृष्टो होमसंबंधो लोकतः प्राप्त इति केवलः फलसंबंधो
विधातुं शक्यः। सोमापौष्णे तु प्रकृतितः खादिरत्वादिविशिष्टस्यैव सूपस्य प्राप्तेरौदुंबरत्वं न लोकतो रूपे प्राप्तम्। अ
तआश्रयसंबंधः फलसंबंधश्च विधेय इति वाक्यभेदादप्रामाण्यमिति पूर्वपक्षः। अप्रामाण्यभियैवार्थवादत्वमिति
सिद्धांतः। हेतुवन्निगादार्थवच्चोपपत्तिभ्याम्। यातुमायिस्येषु रूपेण जुहोति तेन ह्यन्नं क्रियत इति श्रुतं तत्र संदेहः। किं रू
पस्य होमसाधनत्वे तत्र करणतया हेतुरुतार्थवाद इति। तत्र हि शब्दस्य हेतौ शक्तेः प्राशस्त्यलक्षणायामन्याय्यत्वात्
प्रयोजनाधिक्यलाभाच्च हेतुपरत्वे। तथा च येनान्नं क्रियते तेन होतव्यमिति व्याप्तिवचनं कल्प्यते। तेन चरुदर्वीपि
ठरादिद्रव्यरूपस्य होमसाधनत्वसिद्धेः स्रुपेणाजुहोतीत्येतद्यथास्थानुवादः। यद्यपि स्रुपस्य श्रौतकरणत्वदर्व्यादेश्चानु
मानिकत्वात्तुल्यबलत्वान्न विकल्पः संभवति तथापि स्रुपस्याभावे दर्व्यादिविधानमिति पूर्वपक्षः। सिद्धांतस्तु वेदन
स्रुपस्य होमसाधनत्वबोधनेन हेतुपरत्वे प्राप्तिस्तस्य स्वतन्त्रप्रमाणत्वात्। तथा च हि शब्दस्यानपेक्षितार्थत्वेनार्थवि
वक्षा। किं चान्नकरणत्वस्य होमसाधनत्वव्याप्यत्वे स्रुपस्यापि सत्वादन्नकरणत्वाभावाद्धोमसाधनत्वं न स्यात्।

१६

परंपरया न साधनत्वविवक्षायां तु हस्तादेरपि होमसाधनत्वप्राप्तेः स्रुवनियमविधिसंभवेनावद्युस्यानुवा
दायोगात्। क्रियत इति वर्त्तमाननिर्देशाद्वर्त्तमानाभिक्रियस्यैव होमसाधनता विधेया स्यात्। सा च दर्व्या
दीनामशक्या। स्तुतित्वे तु वर्त्तमाननिर्देशो युक्तः। न हि भूते भाविनि वा तादृशी प्रीतिर्यादृशी वर्त्तमाने अतो
र्थवादः तदर्थशास्त्रात्। बर्हिर्देवसदनं दामीत्यादिमंत्राणां धर्मे प्रामाण्यमस्ति न वेति विचार्यते। अ
ग्निहोत्रादिनामधेयस्य मंत्रप्राप्तदेवतायत्तत्वात्तद्विचाराद्दौ मंत्रविरोधः। चो अत्र मंत्राणामदृष्टा
र्थत्वे अर्थप्रकाशनार्थत्वे वा पाठ एव कार्यो न स्मरणं। तानो यज्ञकर्मणि उच्चैः [illegible] चाक्रियंते इत्यादिधर्मवि
धानान्यथानुपपत्त्या पाठसिद्धेः। तत्र किं मंत्राणां पाठद्वारा अदृष्टार्था उत तद्द्वारार्थप्रकाशनाख्यदृष्टका
र्यार्था इति संशयः। तदर्थं च लिंगमभिन्नश्रुत्यादिप्रमाणपंचकस्य मंत्रविनियोगे लिंगापेक्षा नास्ति
उतास्तीति चिंत्यं। तत्र लिंगस्य सामान्यसंबंधकारिश्रुत्यादिपंचकापेक्षत्वेन श्रुत्यादिपंचकस्य लिं
गापेक्षत्वायोगान्मंत्राणामर्थप्रकाशनार्थत्वेप्यव्यापाररूपत्वेन पाठस्यावश्यकत्वादेछवीमचम
रूच्चैस्त्वादिभिः पाठे विनियुक्तानां मंत्राणां पाठप्रकाशकत्वस्यावश्यकत्वात्सर्वेप्यदृष्टार्थाः। अदृष्ट

१६

31

अ

रि

कल्पनाच सिद्धांतेपि मंत्रैरेव स्मर्त्तव्यमिति नियमादृष्टकल्पना तुल्येति प्राप्ते ब्रूमः। अदृष्टे यागार्थानां
स्मरणस्यावश्यकत्वान्मंत्राणां तदर्थत्वेन दृष्टार्थत्वसंभवे अदृष्टकल्पनायोः पदार्थस्मरणोपा
यांतरकल्पनायाश्चायोगात् स्वधर्मार्थप्रकाशनद्वारकमंगित्वे संभवति पुंधर्मे पाठद्वारकमंगत्वायो
गात्। दृष्टार्थत्वे ऽध्ययनविधिबोधितदृष्टार्थताबाधापत्तेश्चार्थप्रकाशनार्थता। वेष्ट्याद्यादीनां पाठस्य
दृष्टार्थत्वासंभवात् अदृष्टार्थतेति वैषम्यं। किंच पूर्वपक्षे रूपेत्वेसादिमंत्राणामेववाक्येन विनि
योगस्येसिद्धत्वात् न बर्हिर्देवसदनं दामीत्यादीनां। तेषामक्रियारूपत्वेन प्रकरणेनाग्रहणादंगत्व
स्यासिद्धत्वात्। न च पाठद्वारैव तेषां प्रकरणेन ग्रहणं भविष्यतीति वाच्यं। पाठसिद्धौ तेषां प्रकरणेन
ग्रहणसिद्धिस्तत्सिद्धौ च तत्सिद्धिरिति अन्योन्याश्रयापत्तेः। न चैतेषां मंत्राणामर्थप्रकाशनद्वारा प्रकर
णेन ग्रहणेप्यन्योन्याश्रयस्तुल्य इति वाच्यं। तेषां वाक्यत्वेन लोकादेवार्थप्रकाशनार्थत्वसिद्धेः। न चार्थप्र
काशनस्य ज्ञानरूपत्वेनाक्रियारूपत्वान्न तद्द्वारा मंत्राणां प्रकरणेन ग्रहणमिति वाच्यं। ज्ञानजनकमा
नसव्यापारस्याप्यर्थप्रकाशनरूपत्वेनाक्षतेः। यत्तूक्तं लिंगस्ये[१]शुसादीनां लिंगसापेक्षतेति तन्न।

१ शुसादिसापेक्षत्वेन। न १

१७

लिंगेन मंत्रस्यापूर्वसाधनत्वबोधार्थं श्रुत्याद्युपेक्षणेन श्रुत्यादीनां चस्वविहितमंत्रकरणत्वनिर्वाहा
र्थं लिंगापेक्षणेन परस्परापेक्षासत्वात्। ननु मंत्राणामर्थप्रकाशनार्थत्वेपि श्रेयःसाधनताबोधकत्वा
न धर्मे प्रामाण्यं स्यात्। न चैतैरपूर्वसाधनत्वेन बर्हिर्लवनादि प्रकाश्यत इति तेषां श्रेयःसाधनताबोध
कत्वमिति वाच्यं। बर्हिर्लुनातीत्यादिविधिबुद्धापूर्वसाधनत्वस्यैतैरप्रकाशनादिति चेन्न। मंत्रस्यापू
र्वसाधनीभूतं बर्हिर्लवनं मंत्ररूपेण प्रकाशयेदिति विधिकल्पनेन स्वात्मनोंगत्वबोधकत्वा
त्प्रामाण्यसिद्धेः। तदुक्तं सोमेश्वरेण। अपूर्वसाधनत्वात्तु लवनादेः समीहते। स्वात्मनोंगत्वबो
धेन मंत्रः प्रामाण्यमश्नुत इति। यद्यपि चैवं विधिकल्पना लिंगादेव भवति तथापि मंत्रलिंगयो
र्धर्मधर्मित्वेनाभेदान्मंत्रप्रामाण्यसिद्धिः। पार्थसारथिस्तु। मंत्राभिधीयते यद्यप्यस्ति मूलां
तरं ततः। पदार्थानां तु मूलत्वमिष्टं तद्भावभावतः। पदार्थास्तत्स्मृतिर्वा स्यादिति वार्त्तिकेन पदार्था
नां वाक्यार्थबोधेकारणतोक्तेः दृष्टत्वेति स्मारकत्वाच्छिनत्तीत्यादिमंत्रविनियोजकवाक्ये वा प्रयोगवि

१८

33

चोदनामंत्राणां प्रदार्थत्वात्प्रामाण्यं अंगत्वेपि प्रमाणत्वात्तेन हि लिंगादिविनियोज्यानां च प्रयोगविधिनैवां
गत्वावगतेर्लिंगादीनां श्रुतिमात्रकल्पकत्वेपि कत्वोन्न मंत्राणामंगत्वबोधकत्वमित्याह । नियमादृष्टस्य
तु दृष्टार्थापरित्यागेनैव कल्पनाद्गुरुभूतत्वमित्यदोषः । वस्तुतस्तु नियमादृष्टे नास्त्येव प्रमाणाभावात् । न च नियम
विधानान्यथानुपपत्त्या तत्सिद्धिः । नियमेन विनात्र प्राप्ता एव न भवतीति कल्पनेनानुपपत्तेः परिहारात् । न
चैवं प्रोक्षणप्रयाजादावप्येवं कल्पनादपूर्वं न स्यादिति वाच्यं तज्जन्योपकाराज्ञानेनापूर्वकल्पनस्यावश्य
कत्वात् । न च नियमस्य जन्योपकाराज्ञानेपि नियमजन्योपकाराज्ञानात्तस्यादृष्टार्थत्वमिति वाच्यं । नियमस्य
पिपृष्टाप्राप्तनियम्यप्राप्तिरूपत्वेन दृष्टार्थत्वात् । किंच इत्यादि नियमादृष्टेन संभवतीति स्यात् क्रियारूप
त्वेनैवादृष्टाजनकत्वात् । न च नियमविशिष्टे योगादिरेव नियमादृष्टमपि जनयतीति वाच्यं । नियम
विना प्रधानापूर्वं न भवतीति कल्पनस्यावश्यकत्वेन गौरवानवकाशात् । न च ज्योतिष्टोमादियागजन्यापूर्वकाले
पुरोडाशादिद्वारा वर्तमानत्वेन पूर्वजनकत्वसंभवेप्यवघातादेरपूर्वोत्पत्तिकाले वर्तमानत्वाभावाद्वक्ष्यमाणं
ज्जन्यमपूर्वं कल्प्यमिति वाच्यं । अवघातादेरपि वितुषीभावादिद्वारा वर्तमानत्वात् । तस्मात्सुरूपार्थत्वा
भुरुत्वादेरेव नियमादृष्टजनकत्वमिति भ्रमः । ननु मंत्राणामर्थप्रकाशनार्थत्वे उरुप्रथा उरु प्रथ

अ

ली

स्वेति पुरोडाशं प्रथयति तां चतुर्भिरभ्रिमादत्ते इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इ
त्यादिमंत्रविधीनां वैयर्थ्यं स्याल्लिंगादेव तदर्थप्राप्तेरिति चेन्न । जै[illegible]धिक्यवृत्तविष्टंभोऽपि ल्येन पुरो
डाशप्रथनाप्राप्तेर्वर्तुलपुरोडाश[illegible]णेन वा प्रथनस्य नियमेनाप्राप्तेः प्रथनस्यैव विधेयत्वात् । अ
तोऽयं मंत्रविनियोगो यज्ञपतिमेव तत्प्रजया पशुभिश्च प्रथयतीति प्रथनार्थवादस्य यस्मात्प्रथनमंत्रे
यज्ञपतिप्रार्थनोक्ता तस्मात्प्रथनेन यज्ञपतिः प्रथितो भवतीत्यर्थोपपत्त्यर्थेऽनुवादः । तां चतुर्भिरित्य
पि मंत्रसमुच्चयविधायकं । अन्यथा मंत्राणां विकल्पादिकप्रापत्तेः । इमामगृभ्णन्निति सविगर्दभाभि
धान्यासने मंत्रपरिसंख्यार्थं । न चोरुप्रथा इति वाक्ये प्रथनविधिवत्राप्यश्वाभिधानीविशिष्टादा
नमेव विधीयतां न मंत्रो लिंगादेव तस्यादाने प्राप्तेरिति वाच्यं । प्रतूर्तं वाजिन्नाद्रवेत्यश्वमभिदधाति
युंजाथां रासभं युवमिति गर्दभमिति विधिद्वयविहिताश्वगर्दभबंधनस्य रशनादानं विना असंभ
वेन तस्य नियमेन प्राप्तेर्विधानायोगात् । ननु यद्यश्वाभिधानीविशिष्टादानोद्देशेन मंत्रो विधीयते

णा

को ५

35.

तर्हि विशिष्टोद्देशाद्वाक्यभेदः स्यात्। अश्वाभिधानीमित्येषणाविषये सामान्तु मन्त्रस्य गर्दभरशनादानेऽ
पि प्राप्तेः परिसंख्या न स्यादिति चेत्। न। प्राप्तिफलको विधिरपूर्वविधिर्यथा व्रीहीन्प्रोक्षतीति। एतद्विधिं वि
ना प्रोक्षणस्य कथमप्यप्राप्तेः। पक्षप्राप्तस्याप्राप्तिपक्षे प्राप्तिफलको विधिर्नियमविधिः। एतद्विध्यभा
वे व्रीहीणां वितुषीभावायावघातवद्दलनादेरपि पक्षे प्राप्तेः इतरनिवृत्तिफलको विधिः परिसंख्या। यथा
इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इति विधिर्गर्दभाभिधान्यादाने मन्त्रनिवृत्तिफलक इ
ति शेषपरिसंख्या। यथा वा गृहमेधीयेष्टावाज्यभागौ यजतीति विधिरन्यांगनिवृत्तिफलक इति शेषपरि
संख्या। न च नियमविधावपीतरनिवृत्तेरावश्यकत्वात्सैव फलमस्त्विति वाच्यम्। अवघातस्य स्वाभावाभा
वरूपत्वेन तद्विधेः स्वाभावव्यावर्तकत्वस्य शीघ्रमुपस्थितेर्विलंबोपस्थिततदभावव्याप्तदलनादिव्या
वर्त्तकत्वायोगात्। नियमपरिसंख्ये च न विधेये किंत्वपूर्वविधिफले अवघातविधेरवघाताक्षेपात्पूर्वं प्रवृ
त्यापूर्वविधित्वात्। इमामगृभ्णन्निति मन्त्रविधेरपि मन्त्रलिंगकल्प्यादश्वरशनादानविनियोगात्पूर्वं प्रवृ
त्याऽपूर्वविधित्वात्। आक्षेपमन्त्रलिंगाभ्यां प्राप्यमाणयोरवघातमन्त्रयोः किमर्थो विधिरिति फलाकांक्षा

तर६

36

१६

यांनियमपरिसंख्ययोरुपस्थितस्याफलत्वसिद्धेश्च। तदुक्तं वार्त्तिके। अप्राप्तविधिरेवायमतो मंत्रस्य निश्चि-
तः। परिसंख्याफलेनोक्तो न विशेषः पुनः श्रुतेः। प्रयोजनं विधेः किं स्यादस्येति तु निरूपणे। न गर्दभाभि-
धानीतः फलमन्यान्निवृत्तेर्नादिति। कथं तर्हि परिसंख्यायां स्वार्थहानिः परार्थपरिकल्पना प्राप्तबाध-
श्चेति दोषत्रयं भाष्यकारैरुक्तमिति चेत्। अत्र प्राञ्चः। दोषत्रयोक्तिर्न मंत्रपरिसंख्याविषया किं तु अंगि-
रसां द्विरात्रप्रकरणगतषोडश्युत्तर इति वाक्यकृतपरिसंख्याविषया तत्रोत्तरेऽहन् द्विरात्रस्य गृह्यते इ-
ति प्रत्यक्षशास्त्रेण प्राप्तस्य षोडशिनो द्विरात्रान्तरे परिसंख्यानात्। तथा इडान्ता आतिथ्या संतिष्ठत इति प-
रिसंख्याविषया तत्राप्यतिदेशतः प्राप्तानामुत्तराङ्गानां परिसंख्यानात्। अत एव वार्त्तिके। यद्यस्य
विनियुक्तस्य प्रत्यक्षा स्यात्पुनः श्रुतिः। ततश्च परिसंख्या नाम सा ज्ञेया त्रिदोषेति प्राप्तपरिसंख्या-
यां दोषत्रयमुक्तमित्याहुः। वस्तुतस्तु इमामगृभ्णन्निति मंत्रस्यापि प्राप्तपरिसंख्यैव। परिसंख्या-
यामुभयत्रानियतप्राप्तिमात्रापेक्षणेन परिसंख्यापकशास्त्रात् पूर्वप्राप्तेरनपेक्षणात्। अप्पय्य-
दीक्षितास्तु यथा ज्योतिष्टोमप्रकरणाधीताया आग्नेय्याः स्तोत्रादौ विनियोगेन निराकांक्षत्वेप्या-

तथा गृहमेधीये ष्टो आज्यभागौ यजतीति वाक्यकृतपरिसंख्याविषया तत्र प्रकृतितः प्राप्तानामाज्य-
भागादितरेषामंगानां परिसंख्यानात्॥ ८

१६

37

स्या

ग्नेय्याग्नीध्रमुपतिष्ठत इति विधिना तस्या एव पुनर्ग्रहणं तन्निवर्त्तकशास्त्राभावात्। तथा इमामगृभ्
णन्निति मंत्रस्य परिसंख्यायकशास्त्राभावे गार्दभरशनादानस्य प्रकाशकाकांक्षायां तस्यैव ग्रहणं स्या
त्। अतस्तन्निवृत्तेः शास्त्राधीनत्वेन प्राप्तपरिसंख्यैवोचितेत्याहुः सोमेश्वरस्तु न ब्राह्मणं हन्यान्नेक्षे
तोद्यंतमादित्यमित्यादिरूपौ पुरुषार्थनिषेधपर्युदासावपि शास्त्रपरिसंख्यारूपावित्याह। अत्र वयं न
चेयं परिसंख्या न युक्ता ब्राह्मणहननादेर्नियतप्राप्त्यभावादिति वाच्यं। रागतः प्राप्तस्य [illegible] प
रिसंख्यायां नियतप्राप्त्यनपेक्षणात्। अन्यथा पंच पंचनखा भक्ष्या इति स्मृतौ पंचत्वविधाने न
पंचभिन्नपंचनखभक्षणस्य परिसंख्यानैतृ। पंचानां पंचभिन्नानां च पंचनखानां भक्षणस्य
नियमेन प्राप्त्यभावात्। न च ऋतौ भार्यामुपेयादिति स्मृतौ ऋतुकालं विशिष्टविधेरन्याय्यत्वात्।
ऋतुगमनविधौ तु ऋतुकालस्यानुपादेयत्वेन विधानासंभवाद्विशिष्टविधिरावश्यकः इह तु पंचत्व
स्योपादेयत्वेन विधिः संभवतीति वैषम्यं। एतेन सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितं। नांतराभो
जनं कुर्यात् अग्निहोत्रसमो विधिरिति स्मृतौ भोजनानुवादेन कालद्वयविधिवदन्ह रदतः परास्तः।

(=ऋत्वविषयत्वेन=)

४ विशिष्टगमननियमविधिर्वं ऋतुविशिष्टं कालं गमनं भक्षणं नियम
विधिरुक्तिविधेकः॥ ४

38

२०

अत एव कालत्रयविशिष्टभोजनविधिरेवायं विज्ञानेश्वरेणोक्तं ॥ न च पंचेति विधेयो विशिष्टवि-
धिलो बोधे स्यत्रयं चिनिगमकमिति वाच्यं । विशिष्टविधिवादिनापि विशेष्यस्य प्राप्तत्वेन सविशेषणे
हि इति न्यायेन परिसंख्यारूपविशेषणविधेरेवांगीकर्तव्यत्वादिति वदामः । यत्तूपयुक्तं दीक्षितैर्विधि-
त्रयोदाहरणावसरे प्रथये यथा षड्भिर्दीक्षयतीत्यग्निप्रकरणगतविधिना दीक्षार्थतया च गतानामाकूति-
मग्निं प्रयुजं स्वाहेत्यादिमंत्राणां स्वाहाकारान्तगबलाद्धोमद्वारेण दीक्षार्थत्वासिद्धेर्होमविधिः कल्प्यते
। तथाग्नेये त्वाजुष्टं प्रोक्षाम्यग्नीषोमाभ्यामित्यादिमंत्रस्य प्रकरणेन दर्शपूर्णमासोपकार्थत्व+सिद्ध्या
हविःप्रोक्षणस्यापूर्वविधिः कल्प्यते इति । व्रीहीन्प्रोक्षतीत्ययं नापूर्वविधिः । तावगतदेवतासंबंधिद्रव्य
प्रोक्षणप्रकाशनबलाद्धविःप्रोक्षणद्वारेण दर्शपूर्णमासापूर्वा* किन्तु यथोरुप्रथा उरुप्रथस्वेति पुरो-
डाशं प्रथयतीत्ययं प्रथनविधिराध्वर्यवे पाठात् प्रथनस्याध्वर्युकर्तृकत्वनियमार्थस्तथा प्रोक्षणविधिरप्या-
ध्वर्यवे पाठात्प्रोक्षणस्याध्वर्युकर्तृकत्वनियमार्थः । यद्यपि च प्रोक्षणविधौ नियम्यः कर्ता नोपात्त-
स्तथापि तस्य कर्तृनियमफलकत्वान्नियमविधित्वाक्षतिः । यद्वा प्रोक्षणमंत्रस्य समाख्ययाध्वर्यो-

र्थत्व+

२०

प्राप्तेस्तत्र च प्रोक्षामीत्युत्तमपुरुषेणैवाध्वर्युकर्तृकत्वसिद्धेर्नाध्वर्युकर्तृकत्वनियमार्थः किंतु

[illegible]

भागे गृह्णातीति नियमविधिः कल्प्यते। यथा वा दर्भैः स्तृणीतेत्यादि तेः सुप्रवर्त्तिताः इति मन्त्रलिङ्ग

प्राप्तं हरितीत्यस्य नियमविधिः कल्प्यते तथात्र करणं गृहीते वरक्षौ दिवे सपत्नवध्यास इति

मन्त्रे हन्तौ लिङ्गेन तिसृत्रेण हननोववधादेरोस्यस्य वध्यास इत्यनेनावघातप्रकाशना द्व

घातनियमविधिसिद्धेर्व्रीहीनवहन्तीत्यस्य न नियमविधित्वं। यथा वा रणौ लावचरो वे कक्र

प्राप्तस्य चरइति वाक्ये तोलू खलमुसलयोर्वा साधनत्वविधानादवघातनियमत्वं चविनानयो

साधनत्वासिद्धेरर्थादवघातनियमप्राप्तेनावघातविधेर्नियमविधित्वं किलु प्रोक्षणविधि

रवघातविधिरवघातस्याध्वर्युकर्तृकत्वनियमार्थः। यथाप्यवघातकर्तृस्य समाख्यया ध्वर्यो

प्राप्तेस्तत्र चावध्यास मित्युत्तमपुरुषेणैवाध्वर्युकर्तृकत्वसिद्धेर्नाध्वर्युकर्तृकत्वनियमार्थः। कि

तर

२१

मंत्रलिंगप्राप्तमव प्रोक्षणपरिसंख्यार्थः। एवं यथा सोमभक्षमंत्रस्य ग्रहणावेक्षणप्रकाशकं भागे
र्न ग्रहणादि नियमविधिः कल्प्यते। यथा वा दर्भैः स्तृणीत हरितैः सुपर्णैरिति मंत्रलिंगाद् दर्भाणां हारि
त्यस्येनिमविधिः कल्प्यते तथा प्रकरणगृहीतेव रक्षोदिवः सपत्नं वध्यासमिति मंत्रे हनो वध लिङी
ति सूत्रेण हनो वधादेशे सत्यस्य वध्यासमित्यनेनावघातप्रकाशनादवघातनियमविधिसिद्धौ व्री
नवहतीत्यस्य न नियमविधित्वं। यद्वा वारणो यज्ञावचरो वैकंकतो यज्ञावचर इति वाक्येनोलूखल
मुसलयोर्यज्ञसाधनत्वविधानादवघातनियमं च विना तयोर्यज्ञसाधनत्वासिद्धेरर्थादवघातनि
यमप्राप्तेर्नावघातविधेर्नियमविधित्वं किंतु प्रोक्षणविधिवदवघातस्याध्वर्युकर्तृकनियमार्थः। य
द्वावघात[illegible]त्रस्य समाख्ययाध्वर्योः प्राप्तस्तत्र चावध्यासमित्युत्तमपुरुषेणैवाध्वर्युकर्तृकत्व
सिद्धेर्नाध्वर्युकर्तृकत्वनियमार्थः किंतु मंत्रलिंगप्राप्तयवावघातपरिसंख्यार्थः। यद्वावघात
स्यात्यंताप्राप्ताध्वर्युकर्तृकत्वप्राप्त्यर्थत्वादपूर्वविधिः। ननु कथमध्वर्युकर्तृत्व स्यात्यंताप्राप्तिरिति

विधिरवघात४ टी.क.१

Left margin: ५३ मं

Right margin: त्व४ २१

चेन्न। मंत्रकल्पितावघातविधेः प्रत्यक्षत्वाभावेनावघाते आध्वर्यवसमाख्याया अभावेनाप्राप्तेः। न चा
ध्वर्योरार्त्विक्त्वेन पक्षेऽवघाते प्राप्ते नास्यापूर्वविधित्वमिति वाच्यं। याजमानेसमाख्यानात्कर्माणि याज
मानानि स्युरिति तार्त्तीयाधिकरणे चमसचोपावसृजत्युखामधिश्रयस्यवहतीति द्वादशाङ्गयाविधीनां
याजमानकाण्डपाठेन विशेषयाजमानसमाख्यया सामान्याध्वर्यवसमाख्याबाधाद्यजमानस्यैवावघा
तेकर्तृत्वप्राप्तेरध्वर्योः पक्षप्राप्त्यभावात्। तथेमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इति प
रिसंख्याविधिरप्ययुक्तः। अश्वरशनाविशिष्टादानोद्देशेनाश्वविशिष्टरशनोद्देशेन वा मंत्रविधौ विशिष्टो
द्देशाद्वाक्यभेदापत्तेर्मंत्रविधानासंभवेन मंत्रपरिसंख्याया अयोगात्। अतो यमपि विधिः प्रोक्षणा
दिविधिवदश्वरशनादानस्याध्वर्युकर्तृकत्वनियमार्थं अश्वगर्दभवचनान्यथानुपपत्तिकल्पितेआ
दानेआध्वर्यवसमाख्याया अभावेन तदप्राप्तेः मंत्रांशे तु न कर्तृविधिः समाख्यया प्राप्तत्वात्। न च
मंत्रस्याध्वर्यवत्वात्तत्प्रकाश्यादानस्याध्वर्युकर्तृकतासिद्धये वेतिन तादर्थ्यं विधेः संभवतीति वाच्यं
अध्वर्युपठितमंत्रेणाप्यन्यस्य स्मरणसंभवेनान्यस्याप्यादाने प्राप्तेरित्युक्तं। तदेतत्सर्वमविचारितरम

णीयं। तथाहि। यत्तावदुक्तमाकूतिमग्निं प्रयुजं स्वाहेति मंत्रलिंगाद्धोमप्राप्तिः सिद्धांतेप्यस्तीति त
दज्ञानविजृंभितं दशमतृतीयपादचतुर्थाधिकरणे भाष्यादौ द्वादशजुहोतीत्यस्यैकादशप्रयाजा
न्यजतीति वस्त्रकृति प्राप्तदीक्षाकृत्यभ्यासविधायकत्वोक्ते [illegible] मंत्रलिं
गस्य होमाप्रापकत्वात्। अतो दृष्टांतस्तावदयुक्तः। यदप्युक्तं गृहणादिप्रकाशकमंत्रलिंगेन
गृहणादिप्राप्तिवन्मंत्रलिंगेन प्रोक्षणावघातप्राप्तेर्न प्रोक्षणावघातविध्योरपूर्वनियमविधि
त्वमिति तदप्यज्ञानविजृंभितं। प्रोक्षणादिविधिं विना प्रोक्षणादेर्यागीयत्वासिद्धेः प्रोक्षणादिमं
त्रस्य च यागीयार्थप्रकाशकत्वं विना प्रकरणेनाग्रहणान्मंत्रलिंगेन प्रोक्षणाद्यप्राप्तेः। तदुक्तं वा
र्त्तिके। मंत्राणामपि यत्कार्यं विहितार्थप्रकाशनं। तेन गोदानगोयातौ नाभ्यासाद्वेदमागताविति
न च प्रकरणेन मंत्रस्वरूपमेव गृह्यतामिति वाच्यं। मंत्रस्याक्रियात्मकत्वे तद्योगात्। तदु
क्तं वार्त्तिके। नावांतरक्रियायोगादृते वाक्योपकल्पितात्। गुणद्रव्ये कथंभावैर्गम्यते प्रकृताः

क्रियाइति। यत्तु वार्त्तिके। प्रयाजादिविधीनां च मन्त्राणां च स्वरूपं प्रकरणेन गृह्यत इत्युक्तं तद्यपालप्रति
ज्ञानादिति सोमेश्वरः। न चोच्चारणद्वारेव प्रकरणेन मन्त्रो गृह्यतेन याथार्थ्यप्रकाशनद्वारेति वाच्यम्
उच्चारणासिद्धौ प्रकरणेन तद्ग्रहणासिद्धेः तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयात्। अन्यथा पूर्वानुमन्त्र
णमन्त्रस्याप्युच्चारणद्वारा ग्रहणेन प्रकरणेनानुग्रहणात् सूर्यदेवत्ययागस्यापि प्रोक्षणादिवदङ्गत्वकल्पनापत्तेः
। न च तस्य समाख्यया यागानुमन्त्रणविनियोगान्न यागकल्प्यकत्वमिति वाच्यं प्रकरणसमाख्ययोर्वि
रोधात्। अन्यथा परमतेऽपि प्रोक्षणादिमन्त्रस्य लिङ्गेन प्रोक्षणादौ विनियोगात् प्रकरणेनाग्रहणापत्तेः। अ
तो न प्रोक्षणादिमन्त्रैः प्रोक्षणादिप्रासिङ्ग। न च प्रोक्षणादिविध्यभावे प्रोक्षणादिमन्त्राणां वैयर्थ्यापत्याद
...सत्वेऽपि लिङ्गकल्प्यकत्वमस्तु। अस्य द्वारविधिना मुख्यकर्ता हि विधायकत्वेन दृष्टार्थत्वादिति वाच्यं। आयु
र्दा अस्यायुर्मे देहि वर्चोदा असि वर्चो मे देहि इत्यादिमन्त्राणामपि इष्टिप्रकरणे पाठस्य प्रकाश्यायुरादिप्रार्थ
नविधिकल्पकत्वापत्तेः। अतो यथा तृतीयाध्यायाष्टमपादस्थपञ्चमाधिकरणे आयुरादिपदस्य प्रच
त्सादृश्येन छिदिते स्वर्गे गौ... पाच्यांगीकारेण अग्नये जुष्टं व्रीहीन्प्रोक्षामि त्वजामि त्वपथ्यामीति यथार्थकल्प
नेन प्रोक्षणादिमन्त्राणामपि यागे एव विनियोगः स्यात्। न चैवं भक्षमन्त्रस्य ग्रहणादिप्रकाशकभागाना
हे स्वर्गदा यागा स्वर्गं मे देहीत्यर्थकल्पना। तेषां यागे विनियोग उक्तः तथा प्रोक्षामिपदस्य कर्मत्वसादृश्येन च
यागे गौणत्वांगीकारेण २

या ४

तद्विधिकल्पक
त्वस्यावश्यकत्वा
तद्विधि

२३

मपि ग्रहणादिविधिकल्पकत्वेन स्यादिति वाच्यं । भक्षमंत्रस्य सर्वस्य समाख्यया भक्षणे विनियोगेन त
द्गतलिंगग्रहणादिप्रकाशकभागानामपि भक्षण एव विनियोगात् भक्षणासंबंधिग्रहणादिप्रकाशकत्वेन
तेषां दृष्टार्थत्वसंभवे सविश्रादिपरत्वं दृष्टार्थत्वायोगेन ग्रहणादिविधिकल्पनं स्यात् वस्तुपकत्वेन वैय
र्थ्यात् । न च ग्रहणादिप्रकाशकभागानां लिंगेन ग्रहणाधारकरते समाख्याया बाधनात्र भक्षणे च वि
निवाच्यं । लिंगस्य सामान्यसंबंधकारित्वसमाख्या पञ्जीववत्त्वेन तद्बाधकत्वायोगात् । न च यागप्रकृ
रूपं सामान्यसंबंधकारि भविष्यतीति वाच्यं । भक्षमंत्रस्याग्रपृष्ठभागयोर्भक्षप्रकाशकत्वेन तद्
नर्ग तेग्रहणप्रकाशकभागानामपि भक्षणप्रकाशकत्वस्यावृत्त्यकत्वेन समाख्ययैव विनियोगात् । ग्र
हणादीनां विध्यभावेन तत्प्रकाशकभागानां यागसंबंध्यर्थप्रकाशकत्वाभावात् प्रकरणेन ग्रहणादि
ष्वित्याच्च एवं च भक्षणीति सकलमंत्रस्य वैदिकत्वरूपाद्विनियोगात्तद्गतलिंगहारित्य प्रकाशकभाग
स्य दृष्टार्थत्वे संभवत्यदृष्टार्थत्वायोगादित्य विधिकल्पनेति द्रष्टव्यं । एवमेव मंत्रवर्णिकदेवता
कल्पनमपि मंत्रस्य श्रुत्यादिभिः कर्मणि विनियोगाद्भवति न तु प्रकरणेन ग्रहणात्तु यदपि प्रथ २३
ने विनापुरोडाशं चोसिद्धा प्रथनस्य नियत्वप्रासेरुरु प्रथस्वेत्यस्य विधिर्यथा सिद्धांते प्रथनस्या

योगा

ध्वर्युकर्तृकत्वमात्रार्थ [illegible] स्तथाप्रोक्षणावघातादिविधिरपिप्रोक्षणादेरध्वर्युकर्तृकत्वमात्रार्थद्
त्युक्तं तद [illegible] प्यज्ञानविजृंभितं। वर्तुलपिष्टपिंडेपिपुरोडाशत्वसत्वेनजलाधिक्यकृतपिष्टशैथिल्येनवा
स्वतएवप्रथनासिद्धेः। प्रथनकर्तव्यतायानियमेनाप्राप्तेः प्रथनस्यसिद्धांतेपिविधेयत्वां [illegible] गीकारात्।
अतएववार्तिकेप्रथनविधौसत्यध्वर्युकर्तृकतापिलभ्यतइत्यपिशब्देनाध्वर्युकर्तृकतायाअनुनिष्पा
दित्वमुक्तं। यत्वाचार्यैर्यद्यपिप्रथनप्राप्तिःस्यात्तथाप्यध्वर्युकर्तृकत्वार्थःपुनःप्रथनविधिरितिपक्षांत
रमुक्तं। तदयुक्तं पुरोडाशस्याष्टाकपालत्वविधानान्यथानुपपत्त्या कूर्माकारत्वविधानान्यथानुपपत्त्या
वाप्रथनप्राप्तिर्वक्तव्या। नचैतदुभयंसंभवति। एकादशाध्यायचतुर्थपादभाष्यादौ कर्कभाष्ये चकपाल
परिमाणस्याविहितत्वोक्तेः। सूक्ष्मकपालोपादानेनपुरोडाशस्यवर्तुलत्वप्राप्त्याप्रथनस्यानियमेनाप्रा
प्तेः। उरुप्रथाउरुप्रथस्वेतिपुरोडाशंप्रथयति। कूर्मस्येवप्रतिकृतिंकरोतीत्यापस्तंबसूत्रेविहितप्रथनेकू
र्माकारताविधानाच्च। जलाधिक्यकृतपिष्ट [illegible] नापिप्रथनस्यानियमेनाप्राप्तेराचार्यैःप्रथनवि
धानस्यावश्यकत्वोक्तेश्च। यदप्यवघातप्रोक्षणविधीयवेषुप्रोक्षणावघातयोःपरिसंख्यार्थावितिपक्षा

शैथिल्ये २

२४

तरमुक्तं तदप्यज्ञानविजृंभितं। मंत्राणां पूर्वोक्तरीत्या प्रकाश्याप्रापकत्वेन प्रोक्षणावघातयोर्निय
मेनाप्राप्त्या परिसंख्यायोगात्। यदपि धारणो यज्ञावचरो वैकंकतो यज्ञावचर इति वाक्येनोलूखल
मुसलयोर्यज्ञसाधनत्वविधानात्तयोर्दृष्टार्थत्वेनैवावघातनियमासिद्धेर्नायं नियमविधिरित्यु
क्तं। तदप्यज्ञानविजृंभितं। वारणो यज्ञावचर इत्यत्र वारणत्वस्य विधेयत्वेनोलूखलमुसलयोर्य
ज्ञसाधनत्वाविधानात्। न च यज्ञायुधानि संभरतीत्यनेन विहितस्योलूखलमुसलासादनस्य दृ
ष्टार्थत्वादवघातस्यानियमासिद्धिरिति वाच्यं। आसादनदृष्टार्थत्वस्यावघातविध्यधीनत्वात्। यद
पि याजमानसमाख्यया विशेषरूपत्वेन यजमानस्यैवावघातकर्तृत्वप्राप्त्यात्यंताप्राप्ताध्वर्युकर्तृ
कता सिद्ध्यर्थत्वेनावघातविधेरपूर्वविधित्वमित्युक्तं। तदप्यज्ञानविजृंभितं। मंत्रादवघातप्राप्तौ
सिद्धायां याजमानसमाख्यातावघातविधिना चाध्वर्यवसमाख्यातावघातविधिना चावघातो वि
धीयते इत्यत्र विनिगमनाविरहेणोभयोरप्यवघातविधायकत्वसिद्धेः। तत्वं चाध्वर्योः साक्षात्कर्तृत्वं
यजमानस्य च स्मारणेनेति तृतीयाध्यायोक्तव्यवस्था द्रष्टव्या। यदपि इमामगृभ्णन्रशनामृतस्ये

२४

सश्वाभिधानीमादत्त इति विधावश्वाभिधानीविशिष्टादानोद्देशेनाश्वविशिष्टाभिधान्युद्देशेन वा मंत्रविधौ
विशिष्टोद्देशाद्वाक्यभेदापत्तेः परिसंख्यायां असंभवाद्दानस्याध्वर्युकर्तृकत्वनियमार्थः पुनर्विशिष्ट
दानविधिरित्युक्तं तदप्यज्ञानविजृंभितं। यथा प्राकाशावध्वर्यवे ददातीत्यत्राध्वर्यूद्देशेन मंत्रो विधीय
ते। आदानं तु प्रत्ययानुग्रहमात्रार्थत्वान्न वाक्यार्थेन्वेति। मंत्रस्य चाश्वाभिधान्यर्थत्वं स्वलिंगावगत
दानप्रकाशनद्वारा बोध्यमिति ह्याचार्याशयः। न चात्र कश्चिदपि दोषोस्ति। यदप्युक्तमश्वाभिधानीवि
शिष्टादानोद्देशो वाक्यभेद इति तदप्ययुक्तं। मध्यामहे हविषा विशेषणामिति न्याये न तस्यापरिहारात्। य
त्वश्वाभिधान्युद्देशे विशिष्टोद्देशेन वाक्यभेदः स्यादित्युक्तं तदप्यज्ञानविजृंभितं। यत्किंचित्सोमलिप्त
मितिवत्समासेन विशिष्टोद्देशो वाक्यभेदाभावात्। अतः परिसंख्यासंभवान्न विधिरादाने
ध्वर्युकर्तृकत्वसिद्धेर्नैतादर्थ्यं विधेर्युक्तं। यदपि तेरश्वाभिधान्युद्देशे विशिष्टोद्देशाद्वाक्यभेदापत्ते
श्वोद्देशेनैव मंत्रो विधीयते। अश्वस्य च मंत्रेण प्रकाशनं तदीयरशनादानप्रकाशनद्वारेत्युक्तं। त
तदप्यज्ञानविजृंभितं। अश्वाभिधान्युद्देशे वाक्यभेदाभावस्योक्तत्वात्। तस्मादपूर्वविध्यायुक्त
स्याध्वर्युकर्तृकत्वार्थः। किंचाश्वबंधनस्या

र्युकर्तृकत्वादेवतद्ग्रहणादानस्याध्व ४

रूपणादेशेपोनयुक्तः। यद[illegible]प्याख्यदीपितैर्लक्षणाद्देशे पर्यग्रंथे विधिरित्यलमप्राप्तस्य सर्वलक्षणम
युक्तं। यदि विधिविषयस्य स्वरूपेणाप्राप्तिर्विवक्षिता तर्ह्यग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादावव्याप्तिर्वि
धिविषयस्याग्निहोत्रस्याग्निहोत्रं जुहोतीत्यनेन प्राप्तत्वात्। अथोद्देश्यसंबंधेनाप्राप्तोसत्यात्प्राप्ति
फलको विधिरपूर्वविधिः। अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रेण किंचिद्भावयेदित्यर्थात्तु तस्याप्राप्ति
रिति विवक्षितं तर्हि तमुक्थ्येन तमतिरात्रेण साधयेदेवं विधावव्याप्तिः। य एवं विद्वानग्निं चिनुत इत्यु
त्पत्तिविधिनाचयनस्य स्वरूपस्य प्राप्तेः। उक्थ्यादिप्रकृतावग्निसाम्ने चयनस्यागतत्वेनोद्देश्योक्थ्यादावप्राप्ति
देशेन प्राप्तेश्च। अथोद्देश्येयस्य कस्यचिदप्राप्तिर्विवक्षिता तमुक्थ्येनेति चिद्भावेत दुक्थ्यादौच
यनाश्रितगुणकामानामप्राप्तिरस्तीति लक्षणस्यनाव्याप्तिरित्यभिमतां तर्हि ऐन्द्रवायवाग्रान्प्रायणीय
दयनीयोदश्राम्न्चाहः। अथैतरेषानवानामहामैन्द्रवायवाग्रप्रथममहरथशुक्राग्रमथाग्रयणाग्रमि
त्यादि द्वादशाहगतत्र्यनीकाविधायकवाक्ये आद्ययोरैन्द्रवायवाग्रताशुक्राग्रतयोरतिदेशेन प्रप्तव
तिद्वादशाहविकारेऽप्राप्तैन्द्रवायवाग्रताशुक्राग्रताप्राप्तिफलकत्वेनोद्देश्यद्वादशाहेऽप्राप्तप्राप्ति
फलकत्वाभावात्। अथ द्वादशाहगतानां प्रत्येकं सोमयागविकारत्वेनैन्द्रवायवाग्रताशुक्राग्रतयोः प्रा

लितरयोः काहरपूर्वार्थत्वेन शास्त्राप्रवृत्तिसर्वाह्लिन्यपरमापूर्वार्थत्वेनाप्राप्तेस्तत्रूपोद्देश्यार्थत्वेना
प्राप्तिसत्वादपूर्वविधित्वलक्षणाद्युक्तमितिरित्यभिमता। तस्यैव घातस्य वितुषीभावार्थत्वेन प्राप्तावप्यपूर्वा
र्थत्वेनाप्राप्तेस्तदर्थत्वेन विधानादपूर्वविधित्वलक्षणोऽस्य नियमविधायकत्वाद्विरिसुस्त्र। तदप्यपूर्वा
न विधेयं भित। उद्देश्यसंबंधेनापि देशातिरिक्तप्रमाणाप्राप्तप्राप्तिफलको विधिरपूर्वविधिरि
त्यपूर्वविधिलक्षणे कस्यापि दोषस्याभावात्। उक्थ्यादावग्निदेशेन चयनप्राप्तावप्युपदेशेन चयना
प्राप्तेः अग्नीकाधारहृदये च इष्टायवाग्रताश्रु आग्रतयोरग्निदेशेन प्राप्तावप्युपदेशेनाप्राप्तेरुभयत्रापि प्र
णसंभवात्। उक्थ्ये ग्नाचयनविधानस्य गुणकामप्रवृत्तिः फलम्। अग्नीकाधारहृदये च इष्टायवाग्रताश्रु
आग्रताविधानस्य वामदेव्यसाधनकपृच्छवलिद्वादशाग्रहविकारे ऐ इष्टायवाग्रताश्रु आग्रता प्राप्तिः फ
लं। यद्यपि नियमः प्राप्तिके सतीति नियमविधिलक्षणमप्ययुक्तं व्रीहिस्वरूपाभावे यवस्वरूपा
पूर्णानामेव प्राप्तेर्व्रीहीणां पक्षे प्राप्त्यभावात्। अथावघातनियमे एकशास्त्राप्रवृत्तौ पक्षप्राप्तिर्विव
क्षिता व्रीह्यादिनियमेऽपि यवशास्त्रसहितव्रीहिशास्त्राप्रवृत्तौ पक्षप्राप्तिर्विवक्षिता। तथान्यैरनेकवि
ध्यप्रवृत्तौ पक्षप्राप्तिर्विवक्षितेत्यभिमता। तत्सुपहव्यादिविहतो श्रुतेर्बहहस्तं भवती साद्दिनियम

वैकृतबृहत्स्तवविध्यभावेन बृहत्स्तवस्य पक्षेऽप्यप्राप्तेः प्राकृतषोडशिग्रहणविधिसहितवै २

तो हि रात्रस्याप्राप्तत्वादिति नियमविधौ स्यादिति। प्राकृतबृह
विधौ षोडशिग्रहणग्रहणवदतिरात्रविकृतौ हि षोडशिग्रहणस्य पक्षेऽप्यप्राप्तेरेवमुक्तो। तदप्यज्ञानवि
द्रथंतरविधिसहिते कृतषोडशिग्रहणविध्यभावे षोडशिग्रहणस्य पक्षेऽप्राप्तेरविवादितत्वात्। तत्र प्राकृतबृहद्रथंतररवि
जृम्भितं। आतिदेशिकविधिभिन्नैकानेकविध्यप्रवृत्तौ पक्षप्राप्तेरविवादितत्वात्। आतिदेशिकत्वात्। यदपि नेरोदुम्बरप्र
ष्योः प्राकृतषोडशिग्रहणग्रहणविध्योश्च विकृतावुपदेशाभावात् आतिदेशिकत्वात्। यदपि नेरोदुम्बरस्य पक्षप्राप्तौ दोदुम्ब
योभयत्र प्राकृतस्वादिरत्वादिविधिसहितोदुम्बरविध्यप्रवृत्तौ समासमोदुम्बरस्य पक्षप्राप्तौ दोदुम्ब
रत्वस्य नियमविधिरित्युक्तं। तदप्यज्ञानविजृम्भितं। प्राकृतस्वादिरत्वादिविधीनां विकृतावोपदेशिकत्वा
भावेन निषिद्धतेऽपि तस्यापूर्वविधित्वागीकारात्। यदपि तेरिदुधोध्वरदुःसाधारणाधारयतीति प्राकृतविधि
महितस्य हिरण्यगर्भः समवर्ततागे इत्याधारमाधारयतीति वैकृतविधेरप्रवृत्तौ हिरण्यगर्भमन्त्रस्य पक्षे
प्यशास्त्रे नियमविधिलक्षणमुख्यासमित्युक्तं। तदप्यज्ञानविजृम्भितं। प्राकृतमन्त्रविधेर्विकृतावोपदेशिक
त्वाभावेन हिरण्यगर्भमन्त्रविधेः सिद्धातेऽप्यपूर्वविधित्वात्। यदपि दीक्षितत्र चान्यत्र च प्राप्त्या विनिपरि
सेस्यात् लक्षणमप्ययुक्तं। तत्रान्यत्र रात्र्योर्विध्युपात्तानुपात्तार्थत्वेयदि रथन्तरसामासोमः स्यादित्या
यवाद्यानग्रहणानहैयादिति परिसंख्यायामध्योदितः। इदं ▬▬▬ प रिसंख्या रथन्तरसामस्वर

२६ २६

तै५

थंतरसामसु च विकृतिषु चोदकात्प्राप्तेरैंद्रवायवाग्रतायां प्रसक्तायामरथंतरसामस्वैंद्रवायवाग्रता
याव्यावृत्त्यर्थं न चात्र रथंतरसामकविकृतीनामुपादानमस्तीत्युक्तं। तदप्यज्ञानविजृंभितं। रथंतरसा
मशब्देन प्रकृतेरिव रथंतरवतीनां विकृतीनामपि विध्युपात्तत्वे रथंतररहितानां च विकृतीनां विध्यनु
पात्तत्वेनादोषात्। यद्वा नैमित्तिकत्वेनैंद्रवायवाग्रताया अत्यंताप्राप्तेरपूर्वविधिरेवायं विकृतिनिष्ठात्तु परि
संख्यानत्फलं। यदपि ते स्तत्राप्यत्र शब्दयोर्ग्रहव्यावर्त्यार्थत्वे त्रीणि हि वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टु
प् अत्र ह्येवावपंत्यत एवोद्वपंतीति परिसंख्यायामव्याप्तिः। अनेन हि विवृद्धस्तोमकेषु क्रतुषु माध्यंदिना
र्भव पावमानगतगायत्र्यादिभिन्नासु ऋक्षु केवलं सामावापस्य परिसंख्या क्रियते। न च सा संभवति। ए
कविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादिवाक्ये स्तोमशब्देन ऋक्सामविशिष्टं चैव संख्याविधाना
द्गायत्र्यादिष्वृक्षु केवलसामावापस्याप्राप्तेरित्युक्तं तदप्यज्ञानविजृंभितं। दशमपंचमपादपंचमाधि
करणे भाष्यकारेणैकविंशादिशब्दैः केवलसामस्वेव संख्याविधानस्यासिद्धांतितत्वेन केवलसामा

२७

वायस्येव गायत्र्यादिषु प्राप्तेः। एतच्च तत्रैवोपपादयिष्यामः। यदपि तैस्तत्रान्यत्रशब्दयोरेकस्मिन्शेषिणि
शेषद्वयप्राप्त्यर्थत्वे इमामगृभ्णन्निति परिसंख्यायामव्याप्तिः। यदि तु तत्रान्यत्रशब्दाभ्यां शेषिद्वये एकस्य
शेषस्य प्राप्तिर्विवक्षिता तर्हीडांतातिथ्या संतिष्ठत इति शेषपरिसंख्यायामव्याप्तिरित्युक्तं तदप्यज्ञानवि
जृंभितं। तत्रान्यत्रशब्दयोः सर्वनामत्वेन पौरुषेयत्वेनचानानुगतार्थत्वेप्यदोषात्। शेषशेषिपरिसंख्या
भेदेन लक्षणाद्वयकल्पनेप्यदोषाच्च। अष्टादशाज्ञानविजृंभितानि संस्थाभेदेन लक्षणाद्वयं पितानीह
मयोक्तमानि। अप्ययुक्ते रेवं यदि कश्चिदेतान्युद्धर्तुमिच्छेत् समभ्यास्ति सेव्यः॥ ॥इत्युमारामात्मजसु
तदिनकरे प्रथमस्याध्यायस्य द्वितीयः पादः॥ ॥धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्॥ ॥
विध्यर्थवादमंत्राणां प्रामाण्यं निरूपितं इदानीं स्मृत्याचाराणां प्रतिपाद्यते। अष्टकाः कर्त्तव्या इत्यादि
स्मृतिप्रामाण्ये विधिप्रामाण्यस्य महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदित्यादिस्मृतिप्रामाण्ये
तद्यथैवाहो मनुष्यराज आगतेन्यस्मिन्वार्हत्युक्षाणं वा वेहतं वा क्षदंत इत्याद्यर्थवादप्रामाण्यस्य नयन्वे

२७

दन्नमासमनइत्यादिस्मृतिप्रामाण्येकेवलाघोभवतिकेवलादीत्यादिमंत्रप्रामाण्यस्यापेक्षितत्वादनंतर्यीय
द्यपिनामधेयप्रामाण्येस्मृतिप्रामाण्यंनापेक्षितंतथापिसोमादिपदानांनामधेयत्वाभावेलोकप्रसिद्धिरु
पाचारप्रामाण्येचतन्मूलभूतस्मृतिप्रामाण्यापेक्षणान्नामधेयप्रामाण्यनिरूपणात्पूर्वमस्यारंभः।त
त्राष्टकाःकर्त्तव्याःप्रपाःकर्तव्याइत्यादिस्मृतयोवसंतोत्सवादिशिष्टाचाराश्चकिमप्रमाणंधर्मेउतप्रमा
णमितिसंशयः।तदर्थंचकिमेषांभ्रांत्यादिमूलत्वमुतश्रुतिमूलत्वमितिचिंत्यं।तत्रस्मृतीनांपौरुषेय
त्वात्पुरुषाणांभ्रमविप्रलंभादिसंभवादप्रामाण्यं।नचस्मृतिकर्तॄणांयोगजधर्मप्रसादाद्धर्माध
र्मप्रत्यक्षमनुमानादिवासंभवति।तेषांधर्मप्रमाजनकत्वस्याद्यपादेनिराकरणात्।नचक्वचित्स्मृतिमू
लवेदोपलंभात्सर्वत्रतन्मूलत्वंकल्पयितुंशक्यं।अप्रयोजकत्वात्।नचसर्वत्रमूलभूताःश्रुतयःसंभ
वंति।अनुपलंभात्।स्मृतिप्रणयनवैयर्थ्यापत्तेश्च।नचतासांपुरुषक्षयेनोत्सन्नत्वान्नोक्तदोषइतिवा
च्यं।उत्सन्नत्वेप्रमाणाभावात्।नचोच्छेदःसंभवति।किंस्मृतिमूलभूताकाचिच्छाखैवोत्सन्नाउतनानाशा
खास्थितास्ततःपठितानिवाक्यान्युत्सन्नानि।नाद्यः।सहस्रसामशाखाएकशतमध्वर्युशाखाएकत

तेतिवाच्यं। औदुम्बर्यादिप्रतिपादकत्वेन स्मृत्यर्थमात्राप्रतिपादकत्वात्। न द्वितीयः। प्रयोजनानुप-
लम्भेदायोगात्। नापि स्मृतिमूलत्वं मूलाः श्रुयो लिङ्गादिकल्प्यश्रुतिवन्नित्यानुमेयाः। स्मृतिकर्तॄणां
तज्ज्ञानासंभवात्। एवं परं स्मृतिमूलत्वेऽन्धपरंपरापत्तेः। लिङ्गादीनां श्रुतिनिष्ठत्वेन वैषम्यात्। अत
स्मृतीनामप्रामाण्यमिति पूर्वपक्षः। सिद्धान्तस्तु। स्मृतीनां शिष्टैरध्ययनाध्यापनार्थानुष्ठानरू-
पपरिग्रहात्प्रामाण्यं। य एव वैदिकार्थानुष्ठातारस्त एव स्मृतिकर्तार इति कर्तृसामान्यात् स्मृतीनां
वेदमूलत्वमिति जीर्णास्तत्र। स्मृतिकर्तॄणां वैदिकार्थानुष्ठानस्यैकेनाप्यदर्शनात्। अतो ये वेद-
स्यैव धर्मे प्रामाण्याङ्गीकर्तारस्ते स्मृतिपरिग्रहरूपेति कर्तार इति कर्तृसामान्याद्वेदमूलत्वसिद्धिः
। किं च बाधकाभावे प्रामाण्यस्य स्वतस्त्वात् स्मृतीनां प्रामाण्यं। न चात्र बाधोऽस्ति। न हि वेदरोहितशुद्रा-
दिकर्तृकत्वराजादिकर्तृकत्वं वा स्मृतीनामङ्गीक्रियते येन तद्बाधः स्यात्। न च विप्रलम्भादिबाधक-
शिष्टपरिग्रहादेव तदभावकल्पनात्। अमश्राङ्गं यास्समभिव्याहारादिति न्यायाभासाद्बहुत्र
स्येष्टाबाधकत्वं कल्प्यते। न च तत्कल्पने प्रमाणमस्ति। पञ्चमा ना एव च श्रुतयः स्मृतीनां मूलं दृष्टा स्यात

राध्याये मिश्रस्य स्मार्त्तानां तरगतश्रुतीनामनुपलंभात् उपलंभेपि चोपसंहाराद्यज्ञानादर्थं च लिंबधनं।
किंच दाक्षिणात्यानां दाक्षिलः एवमङ्गसव्यांगुष्ठमनुष्याः एवमंजते। तस्मादपि विध्यभपन्नप्रतिपधु
तीत्यादिवाक्येषु विधेरस्पष्टत्वात्तदर्थविधानेनाथर्वत्रिबधना। अन्यथा तस्मात् येष्ठपुत्रे धने
निरुधस्ताय यंतीत्यादि शागभ्रात्यानुवादस्यापत्तेः। तस्माल्लोके यद्व्यवस्थानाए यश्रुतयो मूलं। आ
पस्तंबधेनतुते बोमुषन्नाः पाठः प्रयोगादनुमीयेतरस्तु छन्नश्रुतिमूलत्वमुक्तं। यथापित्र्या
गादिदृष्टार्थस्मृतेर्न विपाठो मूलं। तत्राष्टकादीनि साहस्रानुनयोग्रहस्पृधेनः। सतत्त्वं पागवी
ध्यंतर्देवतोकं समाश्रितः। यतो वेदः पुराणानि विधोपनिषदस्तथेति याज्ञवल्क्योक्तेः। वि
रोधे त्वनपेक्षं स्यादसतित्यनुमानं। औदुंबरी स्पृष्ट्वोद्गायेत् इति श्रुतिविरुद्धा औदुंबरी सर्वा वेष्ट
यितव्येति स्मृतिः। जातपुत्रः कृष्णकेशोग्नीनादधीतेति श्रुतिविरुद्धा अष्टाचत्वारिंशद्वर्षाणि

२९

वेदब्रह्मचर्यमिति स्मृतिः। तस्मादग्नीषोमीये संस्थिते यजमानस्य गृहे नाशितव्यमिति श्रुतिविरुद्धा क्रीतरा
तको भोज्यान्न इति स्मृतिरुदाहरणं न च वेष्टिताया अयोदुंबर्याः स्पर्शसंभवान्न स्मृतेः श्रुतिविरोध इति
वाच्यं। परंपरास्पर्शे स्पर्शव्यवहाराभावात्। एताः प्रमाणमप्रमाणं चेति संशयः। तत्र पूर्वाधिकरणन्या
यात्श्रुतिविरुद्धानामपि स्मृतीनां व्रीहियवादिशास्त्रवत्स्पर्शवेष्टनयोर्विकल्पसंभवात्प्रामाण्यं नन्वेवं
श्रुत्यादीनामपि लिंगादिभिर्विरोधे विकल्पः स्यात् न। श्रुत्यादिभिरेकत्र मंत्रविनियोगे कृते मंत्रप्रक
रणिनो नैराकांक्ष्याल्लिंगादिभ्यः श्रुतिकल्पनाया असंभवेन वैषम्यात्। न त्वेवं प्रत्यक्षश्रुत्या स्मृतेर्नै
राकांक्ष्यं येन तन्मूलानुमानं न स्यात्। न च श्रुतिविरोधादेवानुमानानुदयो वन्हाविव शैत्यानुमानस्य
प्रत्यक्षविरोधादिति वाच्यं। वन्हावौष्ण्यशैत्ययोर्विरोधे नानुमानविषयापहारात्। प्रस्तुते च विकल्प
संभवेनानुमानविषयानपहारादिति पूर्वपक्षः। सिद्धांतस्तु स्मृत्यर्थस्य श्रुत्यर्थविरोधेनाशक्यानुष्ठा

२९

नत्व निश्चयाद्विषयापहारादेवाप्रामाण्यं। न च विकल्पात्स्मरस्यर्थस्य शक्यानुष्ठानत्वमिति वाच्यं। तुल्यबलप्रमा
णाप्रापितत्वाभावेनाष्टदोषदुष्टविकल्पायोगात्। न च श्रुतिकल्पनोत्तरं तुल्यबलत्वमिति वाच्यं विकल्पसिद्धौ
स्मरस्यर्थस्य शक्यानुष्ठानत्वे स्मरयाश्रुतिकल्पनासिद्धेस्तत्सिद्धौ च तुल्यबलत्वसिद्ध्या विकल्पसिद्धिरिति चक्र
काश्रयात्। व्रीहियवशास्त्रयोस्तु तुल्यबलत्वेन परस्परपाक्षिकबाधकत्वसंभवादष्टदोषांगीकारः। तथा
तथाहि व्रीहिशास्त्रार्थानुकाले यवशास्त्रस्याप्रामाण्यकल्पनं। क्लृप्तप्रामाण्यस्य त्यागश्चेति दोषद्वयं। यवशास्त्रा
र्थानुष्ठानकाले च यवशास्त्रस्य पूर्वकल्पिताप्रामाण्यस्य त्यागो निराकृतप्रामाण्योज्जीवनं चेति दोषद्वयं। यथा
च यवशास्त्रे चत्वारो दोषाः। एवं व्रीहिशास्त्रेऽपीत्यष्टौ। अत्र चानुष्ठानबोधकत्वतदभावरूपे प्रामाण्याप्रामाण्ये
विवक्षिते न प्रमाजनकत्वतदभावरूपे। असंभवात्। न च यवव्रीहिसमुच्चयेन सर्वदोषपरिहारः शक्यः।
समर्थः पदविधिरिति सूत्रेणानैरपेक्ष्ये पदविधानात्। षोडशिग्रहणाग्रहणादौ समुच्चयासंभवाच्च।

३०

अतो विरुद्धानामप्रामाण्यमिति। हेतुदर्शनाच्च। वैसर्जनहोमीयं वासोऽध्वर्युर्गृण्हातीत्यादिस्मृतेः।
श्रुत्यविरोधेप्यप्रामाण्यं स्मृतिकर्तॄणामाध्वर्यवादिकर्तृत्वेन दृष्टलोभादिकारणसंभवादिति भा
ष्याभिप्रायः आचार्यास्त्वेनं दूषयंति॥ सर्ववेष्टनादिमूलश्रुत्यभावः साधकप्रमाणाभावाद्वा कल्प्यते
बाधकप्रमाणसद्भावाद्वा। स्मृतेरेव साधकप्रमाणत्वात्। यत्तूक्तं स्मृतितो न श्रुत्यनुमानं संभ
वति। विषयापहारादिति तन्न। प्रत्यक्षश्रुतिमूलत्वांगीकारेणानुमानानंगीकारात्। दृश्यते च व्या
पनाथर्वणब्राह्मणयोरेतामुभयतो वाससा परिवेष्टयंति अक्रीतराजकस्यान्नं नाश्नंतीति। तथा
च क्वचिदस्मदादीनां तच्छ्रुत्यप्रत्यक्षत्वेपि न क्षतिः। नहि स्वप्रमाणानिरस्या वस्त्वभावनिश्चयः। अ
तिप्रसंगात्। तदुक्तमाचार्यैः। आत्मीयासरकीयस्य दौर्लभ्यं नहि किंचन। प्रत्यक्षता विशेषेण स्व
प्रत्यक्षसमं हि तत्। भवदेवस्तु विरुद्धश्रुतेरनुमेयत्वेपि नात्र विषयापहारो वक्तव्यो द्वयोस्तयोर्विरो

३०

धानुपस्थितौ विषयानपहारवदत्रापि ग्रहणाग्रहणादिविरुद्धश्रुतिवद्विरोधानुपस्थितेर्विषयानप
हारादिस्याह। द्वितीयोपि किं दृश्याद्दर्शनाद्वा स्मर्त्यर्थाभावव्याप्तार्थांतरबोधकश्रुतिदर्शनाद्वा। नाद्यः।
समस्तशास्त्रोपलंभाभावात्। पुरुषांतरेण दर्शनसंभवाच्च। न द्वितीयः। ग्रहणाग्रहणादिश्रुति
दर्शनाद्विरुद्धश्रुतेः स्मार्तश्रुत्यभावेनाव्याप्तेः। अतो विरुद्धस्मृतीनां नाप्रामाण्यं किंतु स्वप्रत्यक्षश्रु
त्युक्तानुष्ठानसंभवे परप्रत्यक्षश्रुत्यर्थानुष्ठानायोगात् फलतोऽप्रामाण्यं तदुक्तमाचार्यैः। यावदेवं
श्रुतौ कर्म स्मृतौ चान्यत् प्रतीयते। तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यते। यच्च वैसर्जनहोमीयमि
ति स्मृतिर्लोभमूलिके सुस्तंतद्व्ययुक्तं। सर्वत्रानाश्वासप्रसंगात्। तस्मादिदं सूत्रद्वयं स्मृतिवद्बौद्ध
वाक्यानां वेदमूलत्वेन प्रामाण्यमाशंक्य वेदाप्रामाण्यवादिकृतत्वाल्लोभादिमूलत्वाद्वा न प्रामाण्य
मिति व्याख्येयं। सोमेश्वरस्तु श्रुतिविरुद्धस्मृतीनां फलतोपि नाप्रामाण्यं। यथा हि नैकस्यैव हवः सह
पतये इति श्रुतिद्वयस्यापि प्रत्यक्षत्वाच्छनैकाहोपतीविंदते इत्यादिश्रुत्यनुरोधेन सहत्वाविवक्षयानेक

३१

पतितनिषेधाभावपरताकल्प्यते तथा श्रुतिद्वयस्यापि प्रत्यक्षत्वात् सर्वं चेष्टं न स्मृतिमूलश्रुतेः स्वशक्त्यायोग्याल्पदे
शपरित्यागेन सर्वं चेष्टं न परताकल्प्यते। अबाधेन गतौ संभवे स्वाबाधायोगात्। न चानेकस्या इति श्रुत्या नैके
ति श्रुतेरुपसंहारो भवत्विति वाच्यं उभयोरर्थवादत्वेन निषेधस्याप्रत्यक्षत्वात् तत्र कालेन च सहत्वासहत्व
साधारणानेकपतिनिषेधेनैव सहत्वनिषेधप्राप्तेः सहत्वस्यानुवादात्। अष्टाचत्वारिंशद्वर्षब्रह्मचर्यस्मृ
तिरप्याधानानधिकार्यधपंग्वादिविषया। क्रीतराजकादिस्मृतिरप्यापद्विषया। अथैतास्मिन्नधिकरणे स्मृ
तीनां प्रत्यक्षश्रुतिविरोधे संकोचः प्रतिपाद्यत इत्याह। ययं तु यत्र श्रुतिः सावकाशा स्मृतिर्निरवकाशा तत्र
स्मृत्यापि श्रुतिसंकोचः। स्मृतिमूलश्रुतेः पुरुषांतरप्रत्यक्षत्वाद्दानर्थकोप्रमाणानां विपरीतं बलाबलमि
ति न्यायाच्च। अत एव माधवविज्ञानेश्वराभ्यामपतितयजमानविषयत्वेन सावकाशाया आहिताग्निम
ग्निभिर्दहंति यज्ञपात्रैश्चेति श्रुतेः पतितयजमानाग्न्यादिप्रतिपत्तिविधायिका यावेतानं प्रक्षिपेदप्सु आव
शाध्यं चतुष्पथे पात्राणि तु दहेदग्नौ यजमाने रथा मृत इति निरवकाशस्मृत्या संकोच इत्युक्तं। यत्र तु श्रुति

३१

स्मृती उभे अपि सावकाशे यथा उदितहोमश्रुतिरत्यंतादृशीभिन्नतिथिविषयत्वेन सावकाशा अत्यंतादृश्यं
कर्म किंच विधायकस्मृतिश्च स्मार्तकर्मविषयत्वेन सावकाशा तत्र स्मृतेरेव संकोच इत्युक्तं । यत्र तु श्रुतिस्मृ
तीउभे अपि सावकाशे यथा उदितहोमश्रुतिरत्यंतादृशीभिन्नतिथिविषयत्वेन सावकाशा अ
त्यंतादृश्यं कर्म किंच विधायकस्मृतिश्च स्मार्तकर्मविषयत्वेन सावकाशा तत्र स्मृतेरेव संकोचः
दुर्बलत्वादानर्थक्यप्रतिघातप्रभावाच्चेति यदा मत्यागीय हिंसाया निषिद्धत्वप्रतिपादकयोः सां
ख्यशास्त्रानुशास्त्रयो योगाभ्यासे मंत्रजपादिभिर्नित्यकर्मातिक्रमप्रतिपादकयोगागमशास्त्र
योः पाशुपतादिशास्त्राणां च न व्यवस्था कृत्या किंतु प्रामाण्यमेव । अन्यथा या वेदबाह्याः स्मृ
तयो याश्च काश्च कुदृष्टयः सर्वास्ता निःफलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इति मनुवाक्यस्य निर्वि
षयत्वापत्तेरित्याचार्याः । शिष्टाकोपे विरुद्धमिति चेत् । आचांतेन कर्म कर्तव्यं येयज्ञोपवीतिना कर्तव्यं
दक्षिणाचारेण कर्तव्यमिति स्मृतीनां किं श्रुतिविरोधोऽस्ति न वेति चिंत्यते । अत्र चाचकर्मादिविहि

३२

चमनं नोदाहरणं। श्रौतक्रमाविरोधित्वात्। क्षुतादिनिमित्तमपि पुरुषार्थत्वेन विहितं नोदाहरणं तस्य पुरुषार्थत्वेन क्रत्वंगक्रमाद्बहिर्भूतत्वेन विधानाभावात्। अतः क्षुतादिनिमित्तमेव क्रत्वंगत्वेन विहितमाचमनमुदाहरणं। एवं सदोपवीतिना भाव्यमिति पुरुषार्थत्वेन विहितं यज्ञोपवीतं नोदाहरणं। एवं सदोपवीतिना भाव्यमिति पुरुषार्थत्वे नियतोपवीतं नोदाहरणं किंतु क्रत्वंगत्वेन विहितं। तत्र प्रयोगमध्ये आचमनादिकरणे वेदकृत्यावेदिंकरोति त्यादिश्रौतक्रमबाधापत्तेः देवपितृकर्मणोरुपवीतप्राचीनावीतकरणे प्रदक्षिणाचारकरणे च प्रयोगवचनावगतपदार्थाव्यवहितत्वबाधापत्तेः प्रामाण्यं स्मृतीनां। न चाविरोधेपि स्मृतीनां पदार्थविधायकत्वात् श्रुत्यादेश्च तद्गुणक्रमादिविधायकत्वाद्दौर्बल्यमिति वाच्यं। प्रमेयबलाबलत्वे ज्ञानस्य प्रमाणो बलाबलज्ञानोत्तरभावित्वेन दुर्बलत्वादिति पूर्वपक्षः। सिद्धांतस्तु श्रौ

३२

63

चमनादेर्यागकामो वेदिकरणाद्यंगत्वादंगस्य चाव्यवधायकत्वात् योगविधेश्च। प्रत्यक्षपाठाभावेनोपजी
व्यस्मार्त्तपदार्थाबाधेनैव कल्पनाच्छ्रोत क्रम्यस्य नैमित्तिकपदार्थाभावेपि चारितार्थ्याद्‌विरोध एव स्मृतीनां म
त्रनुबाधविरोधस्तथापि प्रमाणयोः स्वरूपतो विरोधाभावात्प्रमेयविरोधेनैव तद्विरोधोपस्थितेः प्रमेयबलाबल
स्य प्रथमोपस्थितत्वाद्बलीयस्त्वमिति जीर्णाः। वयं त्वेतच्चिंत्यं। पश्चादुपस्थितेनापि प्रमाणबलाबलेनेदं र
जतमिति ज्ञानस्य नेदं रजतमिति ज्ञानस्य नेदं रजतमिति ज्ञानेन च बाधसंभवात्पदार्थविरोधार्थमंगेन व्या
पानं नास्तीत्युक्तं तदयुक्तं। अविरोधसिद्धौ स्मृतेः प्रामाण्यसिध्वा स्मार्त्तपदार्थानामंगत्वसिद्धिरंगत्वसिद्धौ
चाविरोधसिद्धिरिपरस्परान्याश्रयात्। यदपि विरोधांगीकारे तत्प्रमाणबलाबलं दुर्बलमित्युक्तं तदप्ययुक्तं
स्मृतिप्रामाण्यसिद्धौ तत्प्रमेयस्य प्रधानांगत्वात् अतोत्र स्मृतेरानर्थक्यापातात्तयाश्रुतेः संकोचः प्रतिपाद्य
तइति ज्ञेयमिति वदामः। उपवीतोदाहरणं च दर्शपूर्णमासतद्विकारभिन्नविषयं। तत्रोपच्यवतो देवल

३२

स्नमेवलकुरुतइतिश्रुत्यैवतीदृष्यानात्। यद्वावर्णकांतरं तत्रवेदसंवादीनिवेदाविरुद्धानिचाहि सान्वेत्यवंदना
दिविधापकानिशाक्यवाक्यान्युदाहरणं। प्रमाणमप्रमाणंवेतिसंशयः वेदविरोधाभावात्प्रमाणमितिपूर्वपक्षः
सिद्धांतस्तुपुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः। वेदाः स्थानानिविद्यानांधर्मस्यचचतुर्दशेतियाज्ञ
वल्क्यादिभिर्धर्मप्रमापकशास्त्रनियमनादन्यतः प्रमितस्यारुपसाधनत्वाभावादप्रामाण्यमिति। अत्रभी
यरूपाअहिंसोदाहरणंनिषेधशास्त्रानस्याशास्त्रादपिकर्तव्यत्वोक्तेः शाक्यवाक्यादपितत्करणेबाधकाभावा
ता। अपिवाकरणाग्रहणेप्रयुक्तानिप्रतीयेरन्। अत्रानिबंधनावसंतोत्सवादयआचाराउदाहरणं। अ
प्रमाणंप्रमाणंचेतिसंशयः। तत्रसदाचारः प्रमाणमितिमन्वादिवाक्यसत्वेपिविशेषतोनिबंधनाभावेन
कः सदाचारइत्यनिर्णयान्मन्वादिभ्योयमाचारः प्रवृत्तइत्यप्यनिर्णयादिदानीतनाचारस्यवेदानध्येतृषु
पिसत्वेनमूलश्रुत्यनिर्णयाद्वसिष्ठादीनांवेदस्मृतिविरुद्धात्महननपरदारागमनादिश्रवणात्कुलदेशभे
दिनपरस्पराचारविगानाच्चनैषांप्रामाण्यमितिपूर्वपक्षः। सिद्धांतस्तुवैदिककर्मकर्तृत्वेनधर्मशास्त्रप

३३.

वर्त्तकत्वेन च मन्वादीनां शिष्टत्वनिर्णयादात्महननादेश्च्यते धर्मबुध्यानुष्ठानादिरूढाचारस्य विरुद्धस्मृ
तिवदप्रामाण्येपि सर्वत्र तत्कनस्यान्यायत्वादिदानींतनशिष्टाचारस्य मन्वादिभ्यः प्रवृत्तिनिर्णयाद्विशेषते
निबंधनाभावेपि शिष्टाचारः प्रमाणमिति मन्वादिवाक्याच्च सर्वेषामाचाराणां प्रामाण्यमिति। तेषु दर्शी
नाद्विरोधस्य समाविप्रतिपत्तिः स्यात्। आचारप्रसंगाच्छास्त्रार्थप्रयोगरूपाचारविप्रतिपत्तौ बलाबलं चिंत्यते
यववराहचेतसशब्दाः किं प्रियंगुशाकुनिविशेषजंबूनां वाचका उत दीर्घशूकसूकरवंजुलानामिति संशयः
उभयत्र शिष्टप्रयोगादुभयं वाच्यमिति पूर्वपक्षः। सिद्धांतस्तु यवमतीभिरद्भिरौदुंबरीं प्रोक्षतीत्यादिविधेयत्वा
न्या ओषधयो म्लायंते अथैते मोदमाना इवोत्तिष्ठंति वराहं गावोनुधावंति। अप्सुजो वेतस इत्यादिवाक्यशेष
श्रवणात्। वसंते सर्वसस्यानां जायते पत्रशातनं। मोदमानाश्च तिष्ठंति यवाः कणिशशालिन इत्यादिस्मृते
श्च यवादिवाचित्वं। न च यत्र वाक्यशेषोस्ति तत्रैव यवादिशब्दानां दीर्घशूकादिवाचित्वं न यवमयश्चरुरुत्स्या
देतदभावादिति वाच्यं। वाक्यशेषोस्ति तत्रैव यवादिशब्दानां दीर्घशूकादिवाचित्वं तयचमयश्चरुरुत्स्यादौ

३४

तदभावादिति वाच्यं वाक्यशेषोस्ति तत्रैव यवाक्यस्य प्रसिद्ध्यनुग्राहकत्वेन शक्तिनिर्णायकत्वादिति भाष्याभि
प्रायः आचार्यस्तु यवादिशब्देषु शिष्टानां विवादाभावादन्यस्य च शिष्टप्रसिद्धिविरोधोदाहरणस्य दर्शनादर्शने
पि संदिग्धेषु वाक्यशेषादिति न्यायेनैव सिद्धांतसिद्धेर्यत्रार्यम्लेच्छयोरभिधानविप्रतिपत्तिर्यथा पीलुशब्द
स्यार्याणां वृक्षविशेषे प्रसिद्धिर्म्लेच्छानां च हस्तिनि तद्विषयमधिकरणं। तत्र म्लेच्छप्रयोगस्याप्यनादित्वा
दुभयं वाच्यमिति पूर्वपक्षः। सिद्धांतस्तूभयं वाच्यं। अनेकशक्तिकल्पनापत्तेः। न च विनिगमनावि
रहः। शिष्टानां शब्दैकसमधिगम्यधर्माधर्मज्ञानार्थं निघंट्वाद्यध्ययनदर्शनाद्धातूनामिवौषधवाच्चिरा
देषु शब्दार्थाविप्लवस्य कल्पयितुं शक्यत्वात्। म्लेच्छेषु शब्दानां व्यवहारमात्रोपयोगित्वेन गौणत्वस्या
सुवचत्वात्। तस्मादार्यप्रसिद्धिर्बलीयसीति। यद्वा पूर्णकांतरं। यत्र मातुलकन्यापरिणयनादौ स्मृत्या
चारयोर्विरोधस्तत्र किं बलीय इति चिंत्यते। तत्रोभयोः श्रुतिमूलत्वाविशेषात्तुल्यबलत्वं। न चानुष्ठा
नरूपस्याचारस्य वेदार्थस्मरणपूर्वकत्वात् स्मृतितो दुर्बलत्वमिति वाच्यं। स्मृतिवाक्यरचनामूलभू

३४

तवेदार्थस्मरणस्यैव प्रामाण्यं। साधितं न साक्षान्मन्वादिवाक्यानां। तेषां तु प्रामाण्यं स्मरणमूलकत्वात्। नबा
चारस्य स्मरणेन तुल्यबलत्वं संभवति तथाहि न तावन्मन्वाद्याचारस्य तन्निष्ठस्मरणे न तुल्यबलत्वं। स्मरण
स्य वेदार्थानुभवजन्यत्वे नैकांतरितप्रामाण्यात्। आचारस्यानुभवजन्यस्मरणजन्यत्वे नद्व्यंतरितप्रामाण्या
त्। पित्राद्याचारस्य तु वसिष्ठाद्याचारस्मरणपूर्वकत्वे न दुर्बलतरत्वं। किंच मन्वादिवाक्यं तत्स्मरणस्य वेदार्था
नुभवजन्यत्वे नैकांतरितप्रामाण्यात्। आचारस्यानुभवजन्यस्मरणजन्यत्वेन द्व्यंतरितप्रामाण्यात्। पित्राद्या
चारस्य तु वसिष्ठाद्याचारस्मरणपूर्वकत्वेन दुर्बलतरत्वं। किंच मन्वादिवाक्यं तत्स्मरणस्य साक्षादनुमापकं।
पित्राद्याचारस्तु पितामहाद्याचारकल्पनद्वारा मन्वाद्याचारानुमापक इति दुर्बलत्वं। तदुक्तमाचार्यैः। आ
चाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनं। तेन द्व्यंतरितं तस्य प्रामाण्यं विप्रकृष्यते इति। किंच मातुलकन्या
परिणयनादौ स्मृत्याचारयोस्तुल्यबलत्वे तस्य प्रत्यवायजनकत्वाजनकत्वापाताद्विरोधः स्यात्। न चाचारस्य
देशविशेषविषयत्वान्मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेदिति

३५

स्मृतिस्तद्भिन्नदेशविषयेतिवाच्यं। दुर्बलेनप्रबलसंकोचायोगात्। अतोमातुलकन्यापरिणयनंरागादिमूलकमित्याचार्याः॥ वयंत्वेतच्छिष्टत्वंवेसर्जनवासोग्रहणस्यापिरागादिमूलकत्वापत्तेः। मातुलकन्यापरिणयनस्यदेशाख्येदेनप्रत्यवायजनकत्वाजनकत्वयोरविरोधाच्च। यदपिबौधायनेनपंचधाविप्रतिपत्तिर्दक्षिणतः अनुपेतेनभार्ययाचसहभोजनंपर्युषितभोजनमुच्छिष्टभोजनंपितृष्वसृमातुलदुहितृपरिणयनमितितथोत्तरतः। पंचधाऊर्णाविक्रयः सीधुपानमुभयतोदद्भिर्व्यवहारास्मिन्देशग्रामाण्यादित्यापस्तंबमतमुपन्यस्यामिथ्येतदितिगौतमउभयंत्वेतन्नाद्रियंतेशिष्टस्मृतिविरोधादितिमातुलकन्यापरिणयनादेर्निषेधउक्तः सउत्तरादिदेशविषयः॥ निषेधस्यगौतमीयत्वोक्त्याआपस्तंबानभिमतत्वसिद्धेः॥ अन्यथाएकाश्रम्यंत्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येतिगौतमेनपरिसंख्यातस्यवानप्रस्थाश्रमादेर्यदुच्यतेद्विजातीनांशूद्रादारोपसंग्रहः॥ तत्तन्ममतंयस्मात्तत्रात्माजायतेस्वयमितियाज्ञवल्क्येनपरिसंख्यातस्यशूद्रापरिणयनस्यचविधिवैयर्थ्यापत्तिः अतोयथैकाश्रम्यमविरक्तविषयंशूद्रानिषेधश्चधर्मप्रजार्थपरिणयनविषयोयस्मा

३५

69

दितिहेतूपादानात्। द्विजस्य भार्या शूद्रा तु धर्मार्थं न भवेत्क्वचित्। रत्यर्थमेव सा तस्य रागांधस्य प्रकीर्तितेति विष्णूक्ते
श्च तथा मातुलकन्यानिषेधोपि दाक्षिणात्यभिन्नविषय इति वदामः सोमेश्वरस्तु तत्प्रांजहु र्मातुलस्येव योषाभागस्ते
पैतृष्वसेयी वपामिवेति गर्भे तु नोजनिता दंपती करितिच श्रुतिलिंगादाचार्यैश्च बलाधिकरणे श्रौतलिंगस्य स्मृति
तो बलीयस्त्वोक्तेः स्तत्सदाचारः। निषेधस्मृतिस्तु पुत्री कृता या दुहितुः पितृगोत्रानिवृत्तेस्तत्सुत विषया पैतृष्वसेयीं
भगिनीं स्वस्त्रीयां मातुरेव च। मातुश्च भ्रातुराप्तस्य गत्वा चांद्रायणं चरेत्। एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धि
मान् ज्ञातित्वेनानुपेयास्ताः पतंति ह्युपयन्न् इति स्मृतौ सज्ञातितया निषेधहेतुत्वोक्तेरित्याहुः। नन्वाचार्योक्तिमहि
म्न्नस्य ब्राह्मणीनां सुरापानस्य दुराचारत्वमयुक्तं ब्राह्मणो न सुरां पिबेदित्यत्र ब्राह्मणस्य पंचविधानुपादेयभि
न्नत्वेनोद्देश्यत्वाभावान्न विशेषणपुंस्त्वस्य विवक्षितत्वादिति चेन्न। विशेषणाविवक्षायामनुवाद्यविशेषणत्व
स्यैवाविवक्षाबीजत्वात्। अन्यथा यूपं छिनत्तीत्यादावुद्देश्यविशेषणैकत्वस्याविवक्षापत्तेः। तथाहि न ब्राह्मणं ह
न्यादित्यादौ यो ब्राह्मणस्तं न हन्यादिति निषेधार्थपक्षे तं च ब्राह्मणं पुमांसमेवेति लिंगविधौ ब्राह्मणपदप्रत्यय

३६

योरावृत्तिः। यद्ब्राह्मणाहननं तत्र कुर्यादिति निषेधार्थपक्षे तत्र पुंसो हननं न कुर्यादिति लिंगाविवक्षो हंतिविध्योरावृ
त्तिः। यद्ब्राह्मणं हन्यात्तत्रेति निषेधार्थपक्षे तं च ब्राह्मणं पुमांसं नेति नञ्ब्राह्मणपदयोरावृत्तिः। एवं ब्राह्मणो
न सुरां पिबेदित्यत्रापि या सुरा तां ब्राह्मणो न पिबेत्। यत्सुरापानं तद्ब्राह्मणो न कुर्यात्। यद्ब्राह्मणः सुरापानं कु
र्यात्तत्रेति वाक्यार्थत्रयं प्रदर्श्य पुंस्त्वविवक्षायां वाक्यभेदो ज्ञेयः। यदं तु सुरापाननिषेधे ब्राह्मणस्य प्रसवायव्या
वृत्त्यानुग्राह्यत्वेन उद्देश्यत्वं तदापि तद्विशेषणपुंस्त्वस्याविवक्षा। न चैवं ब्राह्मणत्वस्याप्यनूद्यपानविशेषण
त्वे नाविवक्षा स्यादिति वाच्यं। अकर्तृकपानासंभवेन मृष्यामहे हविषा विशेषणमिति च तद्विवक्षासिद्धेः।
अतः सिद्धं ब्राह्मणी सुरापानस्य दुराचारत्वं। यद्वा वर्णकांतरं। यत्र लौकिकवैदिकवाक्यशेषयोरर्थाभिधानविप्र
तिपत्तिस्तत्र किं बलीय इति चिंत्यते यथा त्रिवृद्बहिष्पवमानमित्यत्र लोके त्रिवृच्छब्दस्य त्रैगुण्यवाचित्वं वेदे
तु एतद्विध्युत्तरमन्त्र·ककपाठ भवमिस्तुवंतीति च वाक्यशेषयोरर्थाभिधानविप्रतिपत्तिस्तत्र किं बलीय इति
चिंत्यते यथा त्रिवृद्बहिष्पवमानमित्यत्र लोके त्रिवृच्छब्दस्य त्रैगुण्यवाचित्वं। वेदे तु एतद्विध्युत्तरमन्त्र·वकपाठ

३६

त्रयम्निस्तुवंतीति च वाक्यशेषयोरर्थाभिधानप्रेविंतिपत्तिस्तत्र किं बलीय इति चिंत्यते यथा चित्रद्धविष्यवमा
नम्निस्तत्र लोके चित्रशब्दस्य गुणवाचित्वं। वेदे तु एतद्विष्युत्तरमृङ्• वकपाठान्नवम्निस्तुवंतीति च वा
क्यशेषात्। स्तोत्रीपानवकवाचित्वं तथा चरुशब्दस्य स्थालीवचनत्वं लोके। आदित्यः प्रायणीयः पयसि चरुरित्य
त्रादितिमोदनेनेति वाक्यशेषाद्याज्ञिकप्रसिद्धेश्चौदनवचनत्वं तथाश्ववालः प्रस्तर इत्यत्र प्रस्तरस्या
श्वकेशमयत्वं लोकात्। यज्ञो वै देवेभ्योऽश्वो भूत्वापाक्रामत्सोऽपः प्रविशत्स वालधौ गृहीतः स वालान्मुक्त्वा
यो विवेशते वालाः काशतां प्राप्ता इति वाक्यशेषात्काशमयत्वं तत्र लोकस्यादृष्टसाधनत्वबोधे दौर्ब
ल्येपि शक्तिग्रहे कारणत्वेन प्रबलत्वाद्वैदिकशब्देष्वपि लोकगृहीतशक्तिकपदांतरसामानाधिकरण्य
समभिव्याहाराभ्यां शक्तिग्रहाल्लोकप्रसिद्धिर्बलीयसीति पूर्वपक्षः। सिद्धांतस्तु लौकिकार्थग्रहणे वि
ध्यर्थवादयोरेकवाक्यतासिद्धेन तद्ग्रहणं किंतु गौणत्यागाद्वैदिकार्थस्य। सोमेश्वरस्तु गुणयोगासंभ

वान्मुख्यत्वमेव। न चाश्वबालादिशब्दस्य दीर्घत्वादिसादृश्येन गौणप्रयोगोपपत्तेर्नकारशेषु शक्तिकल्पनमि
ति वाच्यं। आश्वबाल प्रस्तर इति विधौ गौणत्वापत्तेः। अन्यथा श्येनेनाभिचरन्यजेतेत्यत्रापि श्येनशब्दस्य
यागे गौणत्वापत्तेः। कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्। त्रिवृद्यूपरशना भवतीत्यादौ तु स्तोत्रीया
नवकासंभवाल्लौकिक एवार्थो ग्राह्यस्तत्रापि शक्तेः। यत्त्वाचार्यैस्तत्रापि वैदिक एवार्थो ग्राह्यः सर्वार्थासंभ
वेपि तत्त्वसंभवादिति पक्षांतरमुक्तं तद्वोद्देश्याह। चरुशब्दस्तु स्थाल्यां गौण एव। ओदनसंबंधित्वेन
लक्षणासंभवाभावानाशक्तिकल्पनापत्तेश्च। अतः सौर्यं चरुमित्यादावोदनस्यैव ग्रहणं। यत्तु दशमे नि
वृद्धरुशब्दयोः पुनरेतदर्थं वक्ष्यते तदन्यत्रार्थवादावेभोपितदर्थत्वसिध्यर्थं। न च संदिग्धेषु वाक्यशे
षादित्यधिकरणेनास्य पौनरुक्त्यं। वाक्यशेषश्रवणात्प्राक् संदेहाभावात्। तदधिकरणस्य त्वनेनाप्यधि
करणेन पौनरुक्त्यमपरिहार्यं। अत्रासंदेहेऽपि वाक्यशेषान्निर्णये सिद्धे संदेहे कैमुतिकन्यायेनैव नि

३७

र्णयसिद्धेः। चोदितं तु प्रतीयेताविरोधात्प्रमाणेन। इदानीमार्यप्रसिद्ध्यभावे म्लेच्छप्रसिद्ध्येः प्रामाण्यं
साध्यते पिकनेमसततामरसशब्दानां कोकिलार्धशतछिद्रपात्रपद्मेषु म्लेच्छानां प्रसिद्धावपि तस्या अ
प्रामाण्यादार्यपरिगृहीतनिगमनिरुक्तव्याकरणादिवशेनार्थकल्पनेति पूर्वपक्षः। सिद्धांतस्तु यद्य
पि म्लेच्छेषु शब्दार्थानादरस्तथापि पिकादिशब्दानां वेदे प्रयोगेणाविप्लवनिश्चयादर्थांशो प्यविप्लवः
कल्प्यते। न च म्लेच्छीयत्वेन तत्प्रसिद्धेरप्रामाण्यं। अनादित्वेन तत्प्रसिद्धेः प्रामाण्यं। अनादित्वेन प्रा
माण्यसंभवात्। आर्याणामर्थांतरप्रसिद्ध्या गौणत्वासंभवात्। निगमादिनार्थकल्पने अननुग
मापत्तेः। प्रमाणप्रमेयबलाबलन्यायेन म्लेच्छप्रसिद्धेः क्लृप्तत्वेन निगमादिकल्प्यार्थतो बलीयस्त्वा
च्च। प्रयोगशास्त्रमिति चेत्। इह श्रौतसूत्राणां वेदांगानां स्मृतीनां शाक्यवाक्यानां च किं वेदवदपौरु
षेयत्वात्स्वातंत्र्येण प्रामाण्यमुत नेति चिंत्यते। तत्रैतेभ्यो वेदवद्धर्माधर्मप्रमोत्पत्तेः स्वातंत्र्येण प्रामा

ण्यं।स्मृतीनामप्यपौरुषेयत्वेन स्वतःप्रामाण्ये संभवति तन्मूलश्रुतं वेदं कल्पयित्वा तस्यापौरु
षेयत्वकल्पनमनन्याय्यं। बुद्धबौधायनादिकर्तृस्मरणं च कटादिवत्प्रवचननिमित्तत्वेनोपपन्नं।
कल्यादीनां तु वैदिकब्रह्मयज्ञविधिविषयत्वादपि नित्यत्वं। अंगानामपि मंत्रब्राह्मणयोर्वेद
नामधेयं षडंगमेक इति वेदत्वस्मरणान्नित्यत्वमिति पूर्वपक्षः॥ सिद्धांतस्तु कर्तृस्मरणादाद्यं देवे
षां पौरुषेयत्वं अन्यथेदानींतनग्रंथेष्वपि नित्यत्वापत्तेः॥ काटकादिसमाख्या तु वेदत्वप्रसिद्धे
रपि सत्त्वात्प्रवचननिमित्तेति कल्प्यते। षडंगमेक इति च परमतोपन्यासात्पूर्वपक्षत्वेन व्याख्ये
यं। प्रवाहनित्यत्वाच्च कल्पसूत्रादीनां नित्यविधिविषयत्वं। कल्पाभ्यलिंगादिकल्पितविनियो
गज्ञानार्थशाखांतरीयांगोपसंहारादिज्ञानार्थाश्च। अतो पत्र श्रुतो बहवः पक्षा उक्ताः सूत्रे
चैकस्तत्र सूत्रोक्त एव ग्राह्यः। श्रुतेर्बलीयस्त्वादिति केचित्। श्रुतेः परोक्षत्वादुभावपि मा

३८

स्याचिस्मन्ये। यत्र तु कल्प्यानां न्याय्येन विरोधस्तत्राप्रामाण्यं। तथाहि। अविशेषादुभौ वेति कात्यायनोक्तं पु
रोडाशद्वयस्य चतुर्धाकरणम प्रमाणं। जैमिनिना तृतीयाध्यायाद्यपादांत्याधिकरणे पुरोडाशं चतुर्धा करोतीति
सामान्यवाक्यस्याग्नेयं चतुर्धा करोतीति शाखांतरीयवाक्येनोपसंहारोक्तेः। न च कात्यायनवचः। श्रुति
मूलकमिति वाच्यं। अविशेषादिति हेतूक्तेः। तथा सत्ताषाढसूत्र इत्यापस्तंबसूत्रे सवनीयपश्वंग पशुपुरो
डाशस्य विकल्पवचनम प्रमाणं। जैमिनिना द्वादशाध्याये सुत्याशिरोवाए तार्हि पशुर्यर्हि वपा मुखिव दति
य द्वीहिमयः पुरोडाशो भवत्यपिहित्या अच्छिद्रतायाइति प्रकृतावग्नीषोमीयपशौ छिद्रापिधानार्थत्वेन
विहितस्य पशुपुरोडाशस्य सवनीयपशावतिदेशाप्राप्तस्यानुसवनं सवनीयाः पुरोडाशा निरूप्यंते अ
पिहित्या अच्छिद्रताया इति विहितानां सवनीयहविषामपि छिद्रापिधानार्थत्वश्रवणेनैकार्थत्वाद्विकल्पः
सवनीयहविषामुपदिष्टत्वेनातिदिष्टपशुपुरोडाशबाधो वेत्याशंक्य छिद्रापिधानस्यासंभवेन तद्दूषणस्या

३६

र्थवादत्वात्पशुपुरोडाशस्य पश्वंगत्वात्सवनीयहविषां च सोमयागांगत्वादेकार्थत्वाभावेन विकल्पबाधयो
रयोगात्पुरोडाशेन माध्यंदिने सवन इति पशुपुरोडाशस्य निस्सवछ्रवणात्रयस्योक्तेः। न चापस्तंबवचः
श्रुतिमूलकमिति वाच्यं। अक्रियामेके न्यत्र तदर्थवादवचनादित्याश्वलायने नहेतूक्तेः। सूत्रार्थस्तु
एके आचार्याः पशुपुरोडाशस्याक्रियां वदंति। अन्यत्र सवनीयहविष्फतदीयच्छिद्रापिधानार्थं नादोक्ते
रिति। तथा यूपैकादशिन्यां यावद्यूपं वेदिरिति कात्यायनोक्ते वेदिपरिमाणमप्रमाणं। जैमिनिनाततीं
याध्याय सप्तमपादे ऽर्धमतवेदिमितो ऽर्ध बहिर्वेदिति वाक्ये वेदिपूर्वं शारतस्थ प्रागुदक्सूत्रसंपा
तदेशलक्षणो क्त्या वेदेर्यूपयमानानंगत्वोक्तेः। तथा चोक्तसंपातोपस्थित्या तत्संबंधिसूत्रद्वयोप
स्थितेस्तत्संबंधाप्राच्युदीनां शयूपपङ्क्तिर्वेदिरद्धिर्विनेव कर्त्तव्या न च कात्यायनवचः श्रुतिमूलक
मिति वाच्यं। जैमिनेरपि तेदर्शनसंभवात्। कर्कोप्येवमाह। तथा पशुगणे आघनीभिः पत्नीः संयाज

३६

77

यंतीतिजाघनीनांसमुच्चयवचनमप्रमाणं।जैमिनिनाद्वादशाध्यायेदर्शपूर्णमासप्रकरणस्थेना
ज्येनजाघन्याशापत्नीः संयाजयतीतिवाक्येनप्रवृत्तोविकल्पितायाः करणीभूतायाएवजाघन्याः
पशुप्रकरणस्थेनजाघन्यापत्नीः संयाजयेतीतिवाक्येननियमतान्नस्याः संस्कार्यत्वाभावेनपशु
गतेसर्वजाघन्यनुपादानोक्तेः।नचेदंवचः।श्रुतिमूलकमितिवाच्यंजैमिनेरपितद्दर्शनसंभवा
त्।तथासर्वाणिहवींषिपर्यग्निकरोतीतिसूत्रप्रमाणं।जैमिनिनाष्टमेध्यायेपशोः पुरोडाशविका
रत्वसाधकेपशुः पुरोडाशविकारः स्यात्पर्यग्निकरणदर्शनादितिसूत्रेपर्यग्निकरणदर्शनस्यहेतु
त्वोक्तेः।तथांगंवासमभिव्याहारादितिकात्यायनोक्तंपिंडपितृयज्ञस्यामावास्याकर्मांगत्वमप्रमाणं।
जैमिनिनाचतुर्थेध्यायेअमावास्यायामपराण्हेपिंडपितृयज्ञइतिवाक्येअमावास्याशब्दस्यल
क्षणिककर्मपरत्वेप्रमाणाभावेनकालपरत्वादंगत्वसाधककर्मसमभिव्याहाराभावोक्तेरितिजै

४०

र्गाः वयंत्वेतद्विद्यं कर्केणपूर्वेद्युः पितृभ्योतिष्ठयं कृत्वा प्रातर्देवेभ्यः प्रतनुतइति वाक्येन पिंडपितृ
यज्ञस्यामावास्यांगत्वमिति सूत्रव्याख्यानात्। न चास्य दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेतिव
त्कालसंबंधार्थत्वमिति वाच्यं। इष्टिसोमयोः फलश्रवणेन वैषम्यादिति वदामः। प्रयोजनं पूर्वपक्षे स्मृ
त्राणां श्रुतिविरोधेपि विकल्पः सिद्धांते सूत्रार्थस्याननुष्ठानमिति। अनुमानव्यवस्था नात्तसें युक्तं प्र
माणं स्यात्। सिद्धस्मृत्याचारप्रामाण्ये किं तेषां वेदवत्सर्ववर्णभेदेन व्यवस्था स्युत नेति चिंत्यते।
तदर्थं च किमेतेषां मूलभूता श्रुति व्यवस्थितविषया शक्यते कल्पयितुमुत नेति संशयाचिंत्यं। तत्र
मनुस्मृतेः सर्वशाखीयैः पाठेपि तद्भिन्नस्मृतीनां स्मार्तसूत्राणां च शाखाविशेषाध्यायिभिरेव पा
ठात्। होलाकाद्याचाराणां च प्राच्याद्यभिमानिभिरेवानुष्ठानात्तन्मूलभूता श्रुतिरपि तद्विषयैव क
ल्प्यात त्कल्पकलिंगस्य व्यवस्थितत्वादिति पूर्वपक्षः। सिद्धांतस्तु। स्मृति गृह्यसूत्रस्थविधिषु

४०

चरणविशेषानुपादानात्तन्मूलश्रुतेः साधारण्यं। पठनव्यवस्थानुकर्त्तुस्तच्चरणत्वात्तद्विनियु
क्तमंत्राणां तत्शाखापठितत्वोपपत्त्या। आचारमूलश्रुतावपि न प्राग्देशस्थितत्वं व्यावर्तकं संभव
ति। प्राग्देशस्थितानामपि प्रतीच्यां प्रपन्ना। आचारमूलश्रुतावपि नामनाचारात्। चिरविनिर्गतपुत्रपौत्रा
णां प्राच्यानां प्रतीच्यामप्याचारात्। किंच सर्वेषां कस्माच्चिद्देशादागतत्वमस्तीति न तस्य व्यावर्तकत्वं।
वयं तु गृह्यसूत्राणां न साधारण्यं। बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितं। तस्य तावति शास्त्रार्थे कृ
ते सर्वैः कृतो भवेदिति गृह्यपरिशिष्टे स[illegible] भाष्योक्तेः स्वस्वगृह्यत्वोक्तेरसाधारण्यं विनानुपपत्तेः। अ
तस्तन्मूलश्रुतेश्चरणपदं कल्प्यं। अत एव सोमेश्वरेण तत्तद्गृह्यसूत्रोक्तोपाकर्मोपनयनकर्मणो
स्तत्तच्छाखाध्ययनाङ्गत्वाद्व्यवस्थेत्युक्तं। यत्तु तेनैव जातकर्मस्थालीपाकादेः शाखाध्ययनानंगत्वा
साधारण्यमित्युक्तं तच्चिंत्यं। स्वगृह्योक्त्या तन्निवृत्तेः। शिष्टाचारविरोधाच्च। अधिकरणं तु कपा

लंभगत्रमिति कृपादितिमंत्ररहितपुरुषार्थकर्मविषयं। तस्य स्तूत्रमिन्त्रस्मृतिविषयं चेति
मः प्रयोगोस्यत्र शास्त्रशास्त्रेषु न व्यवस्था स्यात्। इदानीं व्याकरणस्मृतेः सिद्धमाचार
वृत्तीयस्य समाधिर्यस्समाधीयते। सास्नादिमति किं लौकिका गाव्यादिशब्दा अपि प्रयोज्या उ
त व्याकरणानुगता गवादिशब्दा एवेति विचारः। तत्रोभयेप्यर्थप्रतिपादकत्वात्प्रयोज्याः। न
च गाव्यादिशब्देषु उच्चारणे गो पीवा भविष्यतीति वाच्यं। शक्त्यभावे तयोस्संयोगात्। तान्न च स
ध नैव प्रयुंजते। नोसाधूनिति व्याकरणस्मृत्या गवादिप्रयोगनियमः। गाव्यादिशब्दा अपि
प्रयोज्या उत व्याकरणानुगता गवादिशब्दा एवेति विचारः। शब्दव्यावृत्तसाधुत्वाज्ञाने तस्या
प्रामाण्यात्। न च सुशब्दत्वं शक्तत्वसनादित्वं शिष्टप्रयुक्तत्वं मदृष्टसाधनत्वं वा साधुत्वमि
ति वाच्यं गाव्यादिशब्देष्वपि संबंधुरंस्मरणेन तत्संभवात्। न च गवादय एव साधवो न गाव्या

४१

दयादिव्याकरणस्मृतेर्वेदमूलत्वं संभवति। सर्वसाधुशब्देष्वेकोपलक्षणाभावेन प्रतिपदं श्रु
तिकल्पनापत्तेः। न च साधुत्वा अनेकवाक्यपाठासंभवात्। अपठितानां मूलत्वासंभवाच्च। न
चस्याः स्मृतेः स्मृतिरेव मूलत्वेन श्रुतिरिति वाच्यं। अंधपरंपरापत्तेः। किंच दृष्टसामर्थ्याधिरू
त्यकल्पेदं कुवामदेवादयस्याविनिव्याकरणाद्युत्पादिनकाले यथा मदेव्यशब्दमुत्पन्ने यदवा
लयत्तकाले यस्य काले यत्तं वामयाद्दद्देभ्यो ज्वलितस्मात् वामदेव्यमिति श्रुतिपादितव्यु
त्पत्त्याविरोधाद्व्याकरणस्याप्रामाण्यं। अतः स्वपैर्भावितव्या इति पूर्वपक्षः। सिद्धांतस्तु
शक्तिमत्त्वमेव साधुत्वं न च तत्र अपिकादिशब्दे असाधुत्वापत्तिः तस्यापि शास्त्रे शक्तिम
त्त्वेन साधुत्वासिद्धेः। लौकिकशब्देऽपि शक्तिभ्रमजनकदोषासंभवेन शक्तिकल्पनासाधुत्वाध
तिः। न च गवादीनामिव गाव्यादीनामिव गाव्यादीनामपि शक्तिभ्रमवत्त्विति वाच्यं। अनेकर

४२

क्ति कल्पना पाताल। करहस्तादिवृत्तेस्तु विनिगमनाविरहात्तदंगीकारः। नच प्रस्तुतेपि विनिगम
नाविरहः। पाणिन्यादीनां शिष्टत्वस्य विवादाभावेन तत्स्मृत्या इदानींतनचारस्य बाधात्। चक्रकरण
पाठवाक्ज्ञानस्य तत्र शक्तिभ्रमे पाणिन्यादिशब्दप्रयोगोपपत्तेश्च। एवं साधव इति स्मृतेश्च व्या
करणाभिज्ञवृद्धस्मृतिपरंपरामूलं। नचाधपरंपराप्रवृत्तिः। सर्वकाले शब्दानामर्थानां च ज्ञानं
च स्यादन्वयव्यतिरेकसहितप्रत्यक्षप्रयोगेणैव शक्तिग्रहात्। साधूनेवाभिभाषेत नासा
धूनिति प्रयोगनियमस्मृतेश्च व्याकृता वागुपल इत्यादिश्रुतिरूपत्वः परत्वं नित्यादिश्रुतिलिंगं
सत्यवदनविधिरनृतवदननिषेधश्च मूलं। अर्थसत्यानृतयोरिव शब्दसत्यानृतयोरपि सा
धुत्वासाधुत्वपर्याययोः सत्वात्। नच सत्यमेव प्रयुंजीतेति नियमेनैवासाधुव्यावृत्तिसि
द्धेः किमर्थं पुनर्नासाधूनिति निषेध इति वाच्यं। आचार्येकार्थाधिकरणे सत्यवदनविधेर्वि
ध्यजिह्मायेत च नार्थस्योक्ते नाम साधूनिति निषेधस्य प्रत्यवायपरिहारार्थत्वेनैवोपपत्त्याभावा

४२

83

त्वाम्नइस्यच साधुभाषणान्न स्वर्गः। वेदाध्ययनाभावेनकृताविधर्य्यकरणाध्ययनाभावेनकृता
विधर्य्यकरणाध्ययनाभावेन तस्यानधिकारात्। असाधुभाषणेतु तस्यापि प्रत्यवायः निषेधेपुवेध
स्तानोनपुरुषणात्। तस्याछन्देण व्याकरणाभिषेधो न हिंस्यादिति निषेधस्यायपुत्सानुवादप्रत्यवा
याधिक्यबोधकोवा। अतो निषेधेष्वप्युपसंहारोस्तीतिस्थितं। अतएव साधयहे माङ्भ्यो इत्यौक
निषेधस्यम्ध्येतव्यं नाक निषेध्येनोपसंहारउक्त इतिवृद्धाः। नचगाव्यादि शब्दानां त्वभावेऽ
धीतव्याकरणस्यशक्तिभ्रमासंभवात्कथं गाव्यादिशब्देभ्योगवादिप्रतीतिरितिवाच्यं। शब्दसादृ
श्यादिनोपस्थितात्साधुशब्दादेव तत्प्रतीतिः। वेदविरुद्धं व्याकरणस्यतुसर्ववेच्छनादिस्मरणा
वेदप्रामाण्येपितत्प्रतीतिः। वस्तुतस्तु तस्यापिवेदांतरमूलत्वकत्वसंभवान्नाप्रामाण्यं। अतोगवा
दयएवप्रयोज्याइति। प्रयोगचोदनाभावादर्थैकत्वमविभागादितानं। वाचकनिर्णयप्रसंगा
चात्त्वंनिर्णीयते। तत्रादौलौकिकवैदिकशब्दानां तदर्थानांचाभेदः साध्यते। भेदेहिसतिलौ

कप्रयोगेन कृतोऽर्थनिर्णयो वेदार्थविचारानुपयोगात् व्यर्थः स्यात्। अभेदे तु लौकिकप्रयोगे
नापि कृतोऽर्थनिर्णयो वेदार्थनिर्णयो वेदार्थनिर्णयोपयोगीति न वैयर्थ्यम्। तत्र लौकि
कवैदिकशब्दानां बहुरूपाभेदेनाभेदप्रत्यभिज्ञानेऽपि जराराजपदयोरिव क्रमभेदेन
स्वरच्छान्दसवर्णागमलोपविकारविपर्ययाध्ययनधर्मभेदेन च भेदप्रतीतेरिमे वै
दिकाः शब्दा इमे लौकिका इति व्यपदेशभेदात् स्पष्टभेदप्रादिशब्दसाहचर्याद्वाग्वा
ग्न्यादिशब्दानामुक्तानामेव गवावहलीत्याद्यर्थवादे रथभेदात् लोकवेदयोः पदपदा
र्थानामन्यथामिति पूर्वपक्षः। सिद्धान्ते तु तदेवेदं पदमिति प्रत्यभिज्ञानादभेदः। न च वर्ण
लोपादिधर्मवैलक्षण्येन तद्भेदः। अर्थभेदप्रतीत्यौपाधिकशब्दभेदस्येव पदभेदप्र
योजकत्वात्। अन्यथा देवदत्तबन्धरचेनादावर्थभेदप्रतीत्यौपाधिकस्वरभेदात्पदभे
दोऽङ्गीक्रियतां। अश्ववालादिशब्देषु तु लोकवेदयोरर्थभेदप्रतीत्यौपाधिकयोगशक्ति

८२

ॐ

रूपधर्मभेदात्पदभेदः । रूपादिशब्दसाहचर्येण प्रयोजकत्वान्न भेदं पदाभेदाच्चार्थस्याप्यभे

दः उक्तो [illegible] जातेर्व्यक्तिर्वि [illegible] पदजातिभानुमानवत्स्याद्यन्तेऽमनसाम [illegible]

पुलत्वान्न च [illegible] पप्रपञ्चे व्यक्तेरुपलक्षणत्वं [illegible] नेयना [illegible] यथानुपपत्तिः [illegible] सजोपाधत्वस्य प्र

हे सोपाधे रूपाणां प्रतिपाद्यत्वस्यैव प्रयुक्त्यादिषु कंवी । [illegible] र्थभेदेन च नु [illegible] भ्रमस्त्वेषां

पे चालेक्तीयया [illegible] प्रबलेन रूपापायापेक्षकरणेत्वं भाव्यत्वलिकपरिच्छेदस्य चार्थोत्तरव्य

सरलोक [illegible] जातेर्हे करणत्वावयोर्नानिरूढे [illegible] षष्ठ्यादिः । अग्रे रूपया [illegible] भावीयच्च

करणत्वे च प्रयोज्यरूपापेद्देनेन [illegible] रूपयायाच्या व्यापारेणायाभेदेन भावरूपावृयोरव

धीयते नारूपस्य च [illegible] रूपस्य पाश्चात्यपरिच्छेदकत्वेन क्रियासाधनत्वे व्यापरिच्छेदकत्वात् । गुण

विशिष्ट [illegible] रूपायां [illegible] विशेषणत्व [illegible] योगोरव्यात् । धर्मधर्मिणोरभेदं [illegible]

शारूपाच इत्ययोस्तदभावाच्च । अपि च [illegible] रूपाधिकरणभावव्यापारिकयोररूपाशब्दे

नव्यहनंत्वर्थयाद्दत्त्वाद्यविवक्षितमिति॥ एवं स्थिते विचार्यते किं गवादिशब्दानां व्यक्तिरर्थः उत जातिविशि-
ष्टा व्यक्तिः उत केवलजातिः। तथा रूपादिशब्दानां किं रूपव्यक्तिरर्थः उत रूपत्वादिजातिविशिष्टा सा उत रूप-
त्वादिजातिः। तथा नयतीत्यादौ धात्वर्थानां किं प्रयत्नो वाच्यः उत प्रयत्नत्वविशिष्टः स उत प्रयत्न-
त्वमेवेति। अत्र च फियच्छसोगलीयते किं पुनः क्षणयत्येतावदेव गवादिचार्यो गवादिशब्दाद्विशिष्टव्य-
क्त्यनुभवेऽपि पदाभावात् न च जातेर्वाच्यत्वे तस्या अमूर्तत्वेन गामानय भलगां नह इत्यादि त्यादौ वि-
धिनिषेधयोः लिङ्गसंख्याकारकसम्बन्धस्य योगः शुक्ल इत्यादि सामानाधिकरण्यस्य चायोगाच्छब्दाव्य-
क्तेर्जातिविशिष्टया वाच्या। न च शुद्धव्यक्तिवाचित्वेऽपक्षे यस्यां व्यक्तौ शक्तिग्रहो तत्रैव प्रयोगः
स्यात् नान्यत्रेति वाच्यं। सामान्यमुपलक्षणीकृत्य शक्तिग्रहान्नानुपपत्तेः। उपलक्षणस्य च वावाच्य-
त्वे योयं शुक्लो वासाः स देवदत्त इति वाक्येन शक्तिग्रहे देवदत्तपदेन वाससोऽभिधानापत्तेः। जातिवि-
शिष्टव्यक्त्यभिधाने तु न कोऽपि दोषः काप्यवास्तीति पूर्वपक्षः सिद्धान्तस्तु न तावच्छुद्धव्यक्तयो वाच्याः अनं-

स्य व्यभिचाराभ्यां सर्वासु शक्तिग्रहायोगात्। अनेकशक्तिकल्पनापत्तेश्चानन्त्ये कोपलक्षणेन तत्परि-
हारः। उपलक्षणस्य व्युत्पत्तिकाल एवोपयोगेनाभिधानकालेनुपस्थितेस्तदपरिहारात्। अन्यथा भिन्न-
जातीयघटादिविभीतकादेरेकापवरकस्थितिमुपलक्षणीभूतस्वपरतस्मिन्नपवरके स्थितो न आसते ले-
क्षणत्वाद्घटादेरपि भानापत्तिः। गोव्यक्तित्वेन तु व्यक्तेर्वाच्यत्वे ज्ञात्यभिधानं विनानुपपत्तेर्जातिरेव
विशिष्टव्यक्त्यभिधानमपि नागृहीतविशेषणान्यायादनेकशक्तिकल्पनापत्तेश्चायुक्तं। तस्माज्जा-
तिरेव वाच्या व्यक्तिप्रतीतिस्तु जातिव्यक्त्योरभेदादविनाभावाद्वेति निरूढलक्षणाद्योपपन्नेति जीर्णाः।
काव्यप्रकाशे तु आक्षेपादेव व्यक्तेर्भानं। अभिधालक्षणयोरयुक्तत्वात्। आक्षेपश्च जातेर्व्यक्तिं वि-
नानुपस्थितिः। यद्वा जातिभानसामग्र्या व्यक्तिभानसामग्र्या नियतत्वं। न चाक्षेपपक्षे व्यक्तेरशाब्दत्वा-
च्छाब्दानयनाद्यन्वयानुपपत्तिः शाब्दवृत्तिपाद्यत्वस्य शाब्दत्वे गोरक्षणशब्दप्रतिपाद्यत्वस्येव शाब्दत्वा

८५

दित्युक्तं व्रीहिभिर्यजेतेत्यत्र तु अमूर्त्ताया अपि जातेस्तृतीयया अवांतरव्यापारापेक्षकरण
त्वबोधाद्व्यक्तिपरिच्छेदस्यवांतरव्यापारत्वात् ऐक्यजातेरेव करणत्वान्वयो न निरूढलक्षणा
दि। अरुणया क्रीणातीत्यत्र तु करणत्वस्य अवगतेप्यरुणापदे निरूढलक्षणाया वाच्यारुण
त्वाभेदेन वारुणगुण एव विधीयते नारुणत्वं तस्य गुणमात्रपरिच्छेदकत्वेन क्रियासाधन
द्रव्यापरिच्छेदकत्वात्॥ गुणविशिष्टद्रव्यलक्षणायां लक्षितलक्षणायां वा गौरवात्॥ धर्म
धर्मिणोरेवाभेदांगीकारेणारुणत्वद्रव्ययोस्तदभावाच्च। अत एवारुणाधिकरणभाष्यवा
र्त्तिकयोररुणाशब्देन गुणस्यैव विधिर्न द्रव्यस्येत्युक्तं। व्रीहीन्प्रोक्षतीत्यादौ तु न वाच्य
जातेः साध्यत्वेनान्वयः साध्यत्वस्य करणत्ववत् द्वारानपेक्षत्वेन व्यक्तिपरिच्छेदस्य द्वा
रत्वायोगात्। अतोत्र व्यक्तिलक्षणैव गोः शुक्ल इति सामानाधिकरण्य। लिंगसंख्याका

८५

रकसंबंधश्च लक्षणयोपपन्नः। अतो जातिरेव वाच्या। ननु नागृहीतविशेषणान्यायेतेवाकारश
ब्दाभिधेयस्य व्यक्तिसंस्थानविशेषस्यापि वाच्यत्वं भवतु। तदभावे वैरूप्येन चितिं चिन्वीतेत्यादौ रूप्येन
शब्देनाकारविधानानुपपत्तेरिति चेत्। न। तस्य व्यक्तिवदननुगतत्वेनावाच्यत्वात्। अतः रूप्येनादि
शब्देष्वाकारप्रतीतिर्लक्षणयैव। प्रकारांतरेण च विध्यर्थासंभवाल्लक्षणा न दोष इति। प्रयोज
नं पूर्वपक्षे आहवनीये जुहोतीति सामान्यशास्त्रे जुहोतेः। सामान्यवाचित्वेन पदहोमरूपविशे
षोपस्थितौ विलंबाद्दुर्बलत्वं। न च पदे जुहोतीत्यत्रापि जुहोतेर्होमत्ववाचित्वाद्व्यक्तिविशेषलक्ष
णातुल्येति वाच्यं।। पदविशिष्टहोमस्य विधेयत्वेन व्यक्तिविशेषस्यैवोपस्थितेरिति।। ।।इति
श्रीमद्रामेश्वरसूनुनारायणसूनुरामकृष्णात्मजहितकरकृते भट्टदिनकरे ग्रंथ प्रथमस्याध्याय
स्य तृतीयः पादः।। उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात्।। आद्यत्यधिकरणे लौकिका

५८

नामशब्दानामर्थो विचारितस्तत्प्रसंगादुद्भिदादिकानामर्थो विचार्यते। तत्रोद्भिदा यजेत पशुकामः बल
भिदा यजेताभिजिता यजेत चित्रया यजेतेत्यादिवाक्यस्थोद्भिदादिशब्दानां गुणवाच्यकत्वमुत
कर्मवाचितेति चिंत्यते। तदुपोद्घातत्वेनास्मिन्नधिकरणे किं कर्मवाचकत्वे केनापि रूपेण प्रामा
ण्यं संभवति उत नेति विचार्यते। तत्र न कर्मनाम्नां विधेयसमर्पकत्वं धातुनैव तद्बोधात्। इतरक
र्मभेदस्य विधिभेदेनैव सिद्धेश्च। नापि स्तावकत्वं स्तुतिबुध्यनुत्पत्तेः। नापि मंत्रत्वेन स्मारकत्वं।
मंत्रप्रध्यभावात्। ऋत्यादिभिरविनियोगाच्च। अतो न कर्मनामत्वे केनापि प्रकारेण प्रामाण्यमि
ति प्राप्त उच्यते। विधेयार्थविशेषसमर्पकत्वेनैव नाम्नां प्रामाण्यं। न च तेषां वैयर्थ्यं संकल्पर्त्विग्व
रण गुणफलोपबंधादौ लाघवार्थत्वात्। कर्मभेदार्थत्वाच्च। अतो यथा देवदत्तं पुरुषमानयेत्या
दौ देवदत्तपदस्य पुरुषसंज्ञाविधायकत्वाभावेऽपि पुरुषांतरव्यावर्तकत्वेनोपयोगस्तथोद्भिदादि

५८

शब्दानामपियागांतरव्यावर्त्तकत्वेनोपयोगस्तथोद्भिदादिशब्दानामपियागांतरव्यावर्त्तक
त्वेनोपयोगः।अतएवननामधेयंविधायिष्यतइतिभाष्यमाचार्यैरुद्भिदादेर्जित्यादिवंनामधेयं
नविधीयते।ननुनामधेयार्थेनविधीयतइतिव्याख्यातं।अपिवानामधेयंस्याद्यदुत्पत्तावपूर्व
मविधायकत्वात्।अतःपरंच गुणवाचकत्वंच कर्मनामतेतिकोष्ठशोधनिकंक्रियते।तत्रोद्भि
यौगिकेषूद्भिदादिशब्देषुविचारः।क्रियतेकिंगुणविधिरुतकर्मनामेति।तदर्थंचकिमेतेषां
वैयधिकरण्येनाख्यातसंबंधउतसामानाधिकरण्येनेतिविचार्यं।तत्रउद्भिद्यतेभूमिरने
तिव्युत्पत्त्याखनित्रादावुद्भिच्छब्दप्रसिद्धेर्गुणविधित्वं।नतुउद्भिद्यतेफलमनेनेतिव्युत्पत्त्यायाग
नामत्वं।धात्वर्थस्यविदारणस्यफलेऽसंभावात्।किंच।उद्भिदादिशब्दानांकर्मनामत्वेकर्म
णांधातुनैवोक्तेर्नाम्नांविधेयांतरासमर्पकत्वान्नप्रवृत्तिविशेषकरत्वंस्यात्।अतोगुणविधिः।

८७

सच ज्योतिष्टोमे। उद्भिदादिवाक्यस्थानां ज्योतिष्टोमविकारमध्ये पाठात् प्रकृतित्वेन तदुपस्थितेः।
तांडके ज्योतिष्टोमसन्निधौ पाठाच्च। पशुकामपदं व्यवसायकाम्यप्राप्तज्योतिष्टोमफलानुवादः।
नचोत्पत्तिशिष्टसोमवरोधः। ज्योतिष्टोमवाक्ययागोत्पत्तेरुभयोरप्युत्पन्नशिष्टत्वात्। ज्योति
ष्टोमपदं वा गस्याकर्मनाम। अथवा गुणफलसंबंधविधानादुत्पत्तिशिष्टसोमबाधः। यद्वा गुण
विशिष्टकर्मांतरविधानं। अव्यक्तदेवताकत्वाच्च। तत्सोमयागविकार इति प्राप्तेऽभिधीयते। न
तावदयं गुणफलसंबंधः। धातोरुद्देश्यविधेयासमर्पकत्वेन प्रत्ययानुग्रहमात्रार्थत्वादत्यंत
पारार्थ्यापत्तेः। समानपदोपात्तधात्वर्थपरित्यागेन पदांतरोपात्तगुणविधानाद्विप्रकृष्टार्थवि
ध्यापत्तेश्च। केवलगुणविधावपि धातोरुद्देश्यसमर्पकत्वेन विधेयासमर्पकत्वात् किंचित्सा
रार्थ्यं विप्रकृष्टार्थविधिं फलपदानर्थक्यं चापद्यते। दध्ना जुहोति इन्द्रियकामस्य जुहुया

८७

दित्यादौ तु दध्यादिशब्दस्य प्रसिद्धार्थत्वेनैते दोषा अंगीकृताः। नापि विशिष्टविधिः गौरवापत्तेः फलसाधनेति कर्तव्यतायाश्चकपदानीत्यार्थविशिष्टभावनाल्लक्षकत्वेनु पारार्थ्यापत्तेश्च॥ नाप्यस्तु श्रोत्रोपस्थितस्यैव यागे विशेषणत्वेन भावनात्वभावनालक्षकत्वेन पारार्थ्यापत्तेश्च। नाप्यस्तु श्रोत्रोपस्थितस्यैव यागे विशेषणत्वेन भावनात्वभावनालक्षकत्वेन पारार्थ्यापत्तेश्च। नाप्यस्तु श्रोत्रोपस्थितस्यैव यागे विशेषणत्वेन भावनात्वभावनालक्षकत्वामिति न पारार्थ्यं। पक्षत्रयेपि चामत्वर्थलक्षणादोषस्तुल्यः तथाहि। सोमेन यजेतेत्यादौ न तावत्कुर्भयोर्भावनाकरणांशेऽदृष्टद्वयकल्पनापत्तेः॥ एकस्यां भावनायां अदृष्टद्वयस्वरूपे कल्पनालीयोपकारद्वाराकरणद्वयासम्भवे रणच्चेदं चकाम्यां घटकुविंस्यादौ तु करणद्वयसम्भवेऽसोमिन्नोपकारद्वारकत्वलिवेषम्यं। नापि सोमस्यैव करणात्वं यागे न सोमे दृष्टोपकाराजननाददृष्टद्वयकल्पनस्यापरिहारात्। यागस्यनुभावनाकर

९५

णत्वे सोमेन यागेन इष्टं पकारजनुमानाद् इष्टं द्रव्यकल्पना। अतो न तावत् सोमस्य भावनायां करणत्वं नापि
धात्वर्थे। गुणानां च परार्थत्वादिति न्यायेन कारकाणां भावनागामित्वनियमात्। धात्वर्थस्य भावनाकर
णत्वे साध्यत्वेनानुपस्थितेश्च। नाप्यसाधितस्य तस्य करणत्वानुपपत्तेः। अर्थाच्छिन्नसाध्यत्वमादाय
सोमस्य तत्करणत्वं। शास्त्रीयाकाङ्क्षा शब्देनैव पूर्यत इति न्यायेन शास्त्रकरणत्वस्यार्थसाध्यत्वेन
नन्वयात्। नाप्यद्रव्यत्वे धात्वर्थभावनान्वयात् सोमस्य संबंधः। वाक्यभेदापातात्। अतः सोमेनेति
तृतीयाया भावनायां यागेनान्वयात् सा यागकरणत्वानुवादकत्वं। तच्च सोमप्रातिपदिकेन मत्व
र्थलक्षणां विना अनुपपन्नमिति लक्षणासिद्धिः। सोमस्य च द्रव्यत्वेनेतिकर्तव्यताभावनायामन्वयः
स च आर्थयागप्रतियोगिककरणत्वद्वारा न सोमेनेतिश्रुतकरणत्वद्वारा। न चैकारकाणामेव भा
वनायामन्वय इति नियमः। अभिक्रामं जुहोत्यादेर्भावनायामनन्वयापत्तेः। किंतु कारकाणां भावना
यामेवेति। स सोमस्य च इतिकर्तव्यतात्वं करणानुग्राहकत्वेनेति तस्य यागकरणत्वसिद्धिः। न च

सोमेनेति तृतीयाया यागगतत्वेऽरुणाहूपत्यमुपतिष्ठत इत्यत्रापि तृतीयाया उपस्थानगतकरणत्वा
नुवादकत्वे नैरर्थ्या: श्रौतकरणत्वाभावान्नलिंगबाधः स्यादिति भाष्येऽनुपात्मच करण इतिसूत्रेणाश्चावग
तत्वात् तृतीयात एवमत्यर्थलक्षणा। सूक्तवाकेन प्रस्तरं प्रहरतीत्यत्रापि सूक्तवाककरणत्वावग
प्रहरणेनेति तृतीयातः एवमत्यर्थलक्षणा। तृतीयायाः प्रहरणगतत्वे यागस्याकेन्यनापत्तेः। यत्तु
कश्चित्। सोमेनेत्यत्रापि तृतीयात एवमत्यर्थलक्षणायां याहोतुन्नगोरव्यात्। सोमकरणकस्य याग
भावनायां वान्वयसंभवे नाधिकभाष्याद्युक्तत्वात्। सोमस्येव च सोमकरणकस्य यागविशेषणत्वा
द्युत्करसंबंधीभावात्। न च स्वरूपसंबन्धस्तत्र द्रष्टव्यः। अनन्यगतिगत्वे एतत्तदंगीकारात्। मत्व
र्थलक्षणा च तृतीयात एव न विधेयवशाद्भूरुकः मायावध्येदित्यादि चतुर्थ्यादौ करणत्वस्य समावेश
स्य तन्निमित्त्वात्। चतुर्थ्यर्थस्यापि स्त्वेनानुवादायोगाच्च। न च विष्णुदेवताकेन यागेन भाव
येदिति वाक्यार्थाच्चतुर्थ्यादावपि मत्वर्थलक्षणा स्यादिति वाच्यम्। विष्णुसंप्रदानका याग

४१

करपिकाभावना कर्तव्येति वाक्यार्थात्। न च सोमक्रयणिकायागकरणिका च भावना कर्तव्येति सं
भवति अदृष्टकल्पनापातात्। अत एव दशमाध्यायचतुर्थपादे त्वभागे यदाग्नेयोऽष्टाकपा
ल इत्यत्राग्नेयीभावनायाम् न्यूनेन यागमात्रे अन्यथा सोऽयं चरो स्तूर्यस्या हमुज्जितमनुज्जेसमित्यूहा
सिद्धिप्रसक्तेरित्युक्तं। इत्यत्र च मन्त्रार्थलक्षणाद् भाजुगोती त्यादि गुणविधौ दध्नेन्द्रियकामस्येत्या
त्विकस्यादि लिङ्गे चित्। तेन विशिष्टविधेरलौकिकत्वे विशेष्यप्राप्तिहेतुत्वं च यत्र सार्थलक्षणाय
अलौकिकत्वे हेत्वभावात्। अतस्तत्र लौकिकालौकिकविशिष्टविध्योः स्वार्थिकीमत्वर्थलक्षणेति वा लौ
कग्रन्थस्था लौच्यतालौकिकविशिष्टविधावेव मत्वर्थलक्षणेति चेदन्तः परास्ताः। अत एव विधानेच्छा
नुवादे चा यागः करणमिष्यते। तत्समीपे तल्लीयां तु स्त्वाचिन्त्वं लक्षु च यत्रालौकिकार्थं नानुवादवाक्ये
विमत्वर्थलक्षणोक्ता। यत्तु कश्चित् अनुवादत्वे लौकिक ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि नामधेय
विषयकं तद्व्रीहिभिर्यजेतेत्यादि विषयकं मित्याहुः। तन्न उद्भिदादि शब्दानां गुणविधित्वपक्षेम

४१

त्वर्थलक्षणापत्त्या नामधेयत्वाभावापत्तेः यत्तु करणोत्पत्तिविशिष्टेषु यागार्थत्वसाध्यत्वकल्पना। तस्यां गुण
विधाने मत्वर्थलक्षणा नास्तीति नैतद्व्याख्यानकरणेन गुणविधावपि मत्वर्थलक्षणास्ती
तिसूचितं। इयं च मत्वर्थलक्षणा सोमवत्यादिपदेषु प्रसिद्धार्थत्वादङ्गीकृता। उद्भि
दादिपदेषु त्वप्रसिद्धार्थत्वात्सा दोषः। न चैतेष्वपि योगेन द्रव्यप्रसिद्धिसंभवात्फले च विदा
रणयोगेन प्रसिद्ध्यसंभवाल्लक्षणास्त्विति वाच्यं। उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इत्य
नुशासनादुद्भिद्धस्योत्पत्तौ शक्त्यङ्गीकारात्। न च यत्र प्रमाणान्तरेण तात्पर्यावगतिस्त
त्रोपसर्गबलेन धात्वर्थस्यान्यथात्वं यथा प्रतिष्ठत इत्यत्र। अत्र तु तदनवगतेर्न तत्संभवती
ति वाच्यं। समानाधिकरण्येनैव तत्पर्यावगतेः। तदुक्तमाचार्यैः। परमज्ञातसंदिग्धं प्राप्ति

५०

द्धेरपृथक्श्रुतिनिर्णीयते। इनिरूढं तु न स्वार्थादपनीयते। इति प्रसिद्धेरपृथक्श्रु ती
त्वेन न समानाधिकरण्यमेव सर्वत्र नामत्वसाधकं मत्वर्थलक्षणा वाक्यभेद तत्प्रख्यात
द्व्यपदेशास्तु गुणविधित्वदूषकाः। तस्मादुद्भिदादिशब्दानां नामत्वं। अथैष ज्योतिरित्याद
वप्येतेन सहस्रदक्षिणेन यजेतेत्यत्र ज्योतिष्टोमानुवादेन ज्योतिशयांलेन तच्छब्देन पराप
ग्नित्वमत्वर्थलक्षणापत्तेरेतेनैव न्यायेन नामत्वं। यद्वा ज्योतिष्टोमानुवादेन ज्योतिशख्य
गुणस्य सहस्रदक्षिणायाश्च विधाने वाक्यभेदापत्तेश्चित्राधिकरणन्यायेन नामत्वं।
केचित्तु अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैरिति वार्तिकेन संदेहे अप्रामा
ण्योक्तेः गुणविधिपक्षे कर्मव्युत्पत्तिः। करणव्युत्पत्तिर्वेति संदेहादप्रामाण्यापत्तिः। सि
द्धान्तबीजमित्याहुस्तत्र उद्भिदादिशब्दे कर्मव्युत्पत्तेः। कथंचित्संभवेऽपि बलभिद्विश्वजि

५०

शादिशब्देतदसंभावात्।उद्भिदादिशब्दाश्चयोगरूढाःकर्मांतरेप्रयोगाभावात्।नामप्रयो
जनंचसंकल्पत्विग्ववैरणादौलाघवंकर्मभेदश्चाययद्यपिकर्मभेदस्याभ्यासादपिसिद्धिस्त
थापिनाम्नापितत्सिद्धिः।प्रकृतिनस्तुभेदोनाम्नैवनामाभावेज्योतिष्टोमस्यैवफलसंबंधक
रणेनयागविधानासंभावात्।विश्वजितायजेतेत्यादौचप्रतितिष्ठंतिहवायएतारात्रीरुपयं
तीत्याद्यर्थवादशब्दिवन्नाम्नोविश्वजयाख्यफलबोधनंमपिप्रयोजनमितिमामकःपंथाः।यस्मि
न्गुणोपदेशःप्रधानतोभिसंबंधः।इहचित्रयायजेतपशुकामः।पंचदशान्याज्यानिसप्तद
शानिपृष्ठानित्रिवृद्बर्हिः।पवमानमित्यादिवाक्यस्थारूढाश्चित्रादिशब्दाउदाहरणं।
गुणविधिःकर्मनामवेतिविचारः।तत्रचित्रयेत्यनेनाग्नीषोमीयपश्वनुवादेनचित्रत्वंस्त्री
त्वंचविधीयतेचित्रत्वविशिष्टस्त्रीत्वस्यपशावेवसंभवेनसर्वपशुप्रकृतित्वेनचतदुपस्थितेः।

उभयविशिष्टकारकंविधानाच्चनवाक्यभेदः।ननुस्त्रीत्वस्यानारभ्याधीतसाप्तदश्यानि
वेशात्पुंड्व्यावरुद्धैग्नीषोमीयेस्त्रीत्वस्यनिवेशायोगादितिचेन्न।चित्रयेतिवाक्येनस्त्री
त्वस्यक्रतुसंबंधबोधात्।साप्तदश्यतुसामिधेनीसंबंधमात्रंक्लृप्तंनक्रतुसंबंधइतिवैष
म्यंपशुकामपदंतुअर्जनगतयाप्राप्तयागसाधनकामनानुवादः।यद्वागुणफलसंबंधः।
तथाचनित्यस्यक्रछ्सारंगादेर्गुणस्यपुंस्त्वस्यचबाधः।यद्वागुणविशिष्टकर्मविधिः।
एवंपंचदशान्याज्यानीत्यत्रापिसंख्याविशिष्टाज्यविधिः।आज्यैस्तुवतइत्येतद्वाक्य
विहितस्तोत्रप्रकरणेनैवचप्राप्तः।स्तोत्राणामाज्यसंबंधआज्यैरित्यनेनाज्यवद्भिः।
स्तोत्रैरितिमत्वर्थलक्षणयानूदितः।अनुवादत्वाच्चमत्वर्थलक्षणायांनदोषाः।एवंस
प्तदशानिपृष्ठानीत्यत्रपुरुषाणांपराङ्मुखतयासप्तदशपृष्ठानिविधीयंते।एवेतिर

द्वहिः पवमानमित्यत्र संदंशो मंडपाद्बहिः पवतेक्षरति एतादृशं दृष्टांतव्याख्यां विधीयते। सर्वानुस्मृतिः
सरला त्रिपुटा त्रिवृता त्रिवृदित्यमरादिति प्राप्ते ब्रूमः। चित्रयेत्यनेनाग्नीषोमीयस्य प्रकरणा
भावान्न तदंगभूतगुणस्यापि फलसंबंधः। विशिष्टविधावपि गौरवं मत्वर्थलक्षणा देवतायाः
अलाभः। दधि मधु घृतं पयो धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्यमिति प्रकृतयागे फ
लकल्पनापत्तिश्च। अतः प्रकृतस्य कर्मणो नानाद्रव्यकत्वेन चित्रद्रव्यकत्वाच्चित्राशब्दस्य
तन्नामत्वं। ननु दध्यादिद्रव्यका यागाः सप्तदश प्राजापत्यानिति वद्भिन्नाः। तत्प्राजापत्यमि
ति तच्छब्दनिर्दिष्टस्य दध्यादेः प्रत्येकं प्रजापतिसंबंधविधानात्। संसृष्टमिति च संप्रति
पन्नदेवताकत्वसिद्धसंसर्गानुवादः। तथा चैकस्यापि यागस्य चित्रद्रव्यकत्वाभावान्न
चित्रापदोपपत्तिरिति चेत्। न यागबहुत्वेपि सर्वेषां तंत्रानुष्ठानादेकत्यागस्य चित्रद्रव्य

५२

कत्वसिद्धेः। तथा च यागसमुदायस्याभिन्नद्रव्यकत्वाच्चित्रापदराजसूयपदवत्समुदायस्य
नामधेयं स्त्रीत्वं त्वग्निहोत्रमिति नपुंसकत्ववद्बोध्यं। पंचदशान्याज्यानीत्यत्रापि समासा
भावेन लोहितोष्णीषा इतिवत् विशिष्टद्रव्याप्रतीतेः। प्रकृतौ स्तवप्यक्रियात्मकत्वेन विशिष्ट
द्रव्यविधानप्रकरणग्रहणयोगात् तद्द्व्यसंख्ययोः प्रत्येकं विधानमिति वाक्यभेदः। न चास्ति
भवंतोपरः क्रमवस्य योगेप्यस्तीति व्याकरणात् पंचदशत्वविशिष्टाज्यसत्ता विधानेना वा
क्यभेद इति वाच्यं। प्रत्येकवर्त्तिसत्ताभेदेन वाक्यभेदापरिहारात्। न चाज्यैः स्तुवत इत्यनेन
घृतानां स्तोत्रसाधनत्वेन विधानात्तदनुवादेन पंचदशान्याज्यानीति संख्याविधानमिति
वाच्यं। स्तोमे ऽ विधिः। पंचदशाद्यर्थ इत्येतद्विरोधापातात्। आज्यैरित्यत्र मत्वर्थलक्षणा
पातात्। घृतानां स्तोत्रसाधनत्वेन स्तोत्रे विधानायोगाच्च। न वाज्यपदं लक्षणया घृतप्र

५२

103

काशाकमंत्रपरमिति वाच्यं। विधौ लक्षणाया अन्याय्यत्वात्। घृतप्रकाशकमंत्राभावा
च्च। तस्माद्धाज्यानुवादेन संख्यामात्रे विधिः यत्तच्चोद्यते तावाज्यपदस्य स्तोत्रनामत्वे घटते
नान्यथेति नामत्वसिद्धिः। एवं चाज्यैः स्तुवत इति सामानाधिकरण्यं यदाज्यैर्मीयुस्त
दाज्यानामाज्यत्वमित्यादिवाक्यशेषश्च घटते। एवं सप्तदशानि पृष्ठानि त्रिवृद्बहिःपवमा
नमित्यत्रापि संख्यादिविशिष्टद्रव्यविधेरसंभवात्। प्रत्येकविधौ च वाक्यभेदापत्तेः पृष्ठै
स्तुवते बहिःपवमानेन स्तुवत इत्युत्पत्तिवाक्यविहितत्तत्स्तोत्रानुवादेन गुणमात्रविधिः
यत्तु पार्थसारथीः पृष्ठैस्तुवत इत्युत्पत्तिवाक्ये तु पृष्ठैरिति बहुवचनाज्ज्योतिष्टोमे बहूनि पृ
ष्ठानि न वेयुः तत्र प्रसमये वक्ष्यते ज्योतिष्टोमे द्वयोरेव पृष्ठयोः सत्त्वाद्विश्वजिति बहुत्वा
पेक्षः। सर्वपृष्ठशब्दो न चोदकप्राप्तानुवादः संभवतीति सर्वपृष्ठशब्देन षाडहिकपृष्ठवि।

धानामिति तद्विकल्प्यते अतो रथंतरं पृष्ठं भवति बृहत्पृष्ठं भवतीति वाक्यद्वयं द्वयोः पृष्ठयो
र्विधायकमित्याह तत्र रथंतरं पृष्ठं भवति बृहत्पृष्ठं भवतीत्यनयोः व्रीहिभिर्यजेतेतिवत्तत्र बृहद्रथं
तरयोरुभयोः साम्नोर्गुणमात्रविधायकत्वेन पृष्ठस्तोत्राविधायकत्वात् पृष्ठैः स्तुवतइति वाक्यस्या
नुत्पत्तिपरत्वे वैयर्थ्यापत्तेश्च। पृष्ठैरिति बहुवचनेन्यानामिव पृष्ठानामन्येषां भावेन।
पृष्ठशब्दस्य पृष्ठापृष्ठसमुदाये गौणत्वादुपपन्नमिति नवमे वक्ष्यते गागानस्तु समि
धो यजतीत्यत्र बहुवचनस्यैकस्मिन्नयोगेऽप्यदर्शनवत्पृष्ठैरिति बहुवचनमप्येकस्मिन्स्तो
त्रेच्छांदसमित्याह। तत्प्रख्यं चान्यशास्त्रं अग्निहोत्रं जुहोत्या[illegible]रमाघारमाघारयतीति
त्यादिष्वग्निहोत्रादिशब्दः किं गुणविधिर्नामधेयं वेति संशयः तत्राग्नये होत्रं हूयमानं द्र
व्यं यस्मिन्निति बहुव्रीहिणैव मत्वर्थस्योपात्तत्वेन मत्वर्थलक्षणाभावादग्निर्देवता वि

५३

शिष्टकर्मविधिः। कर्ममात्रविधाने तस्यारूपस्याप्राप्तेः। न च यदग्नये च प्रजापतये च सायं जुहोतीयत्र सूर्याय
च प्रजापतये च प्रातरित्यनेन देवताप्राप्तिर्नो रूपत्वमिति वाच्यं। कर्मानुवादेनानेकगुणविध्यसंभवे
न तत्र विशिष्टकर्मान्तरविधानात्। एवमाधारवाक्येपि आधार्यते स्त्रायुतं इत्याधार इति व्युत्पत्त्या
क्षरणसमर्थद्रव्यस्याज्यपयःप्रभृतेः क्षारणरूपसंस्कारविधानं। संस्कृतस्य च प्रयाजना
पहत्वेन प्रतीकानन्निषुण्यादितिवत्तमस्मै च प्रत्यच्छेदिति वच्च प्रकरणात्। द्रव्यापेक्षो पो
नुयाजार्थता कल्प्यते। प्रधानार्थत्वसंभवेऽङ्गार्थत्वस्यान्याय्यत्वात्। ध्रौवस्य तु सर्वप्रदग्रहणे
न सर्वार्थत्वोक्तेस्तस्य उपांशुयागातिरिक्तविषयत्वं। प्रकरणेन च मत्त्वर्थयुक्तस्यैव वाक्य
स्य कल्पनान्न मत्वर्थलक्षणादोषः एवं चाधारस्य संस्कार्यत्वादग्निहोत्रे चार्थाप्तिमसाध्य
त्वादितिथा निर्देशभयं पद्यते। नामत्वे तु कर्मनः करणत्वेन तद्धाचि नामापि तत्तीयान्तं स्यात्। न
न च फलवाक्य एव कर्मणः करणत्वमुत्पत्तिवाक्ये तु फलवाक्यापेक्षितं कर्मस्वरूपं साध्यत्वेन

प्रतिपाद्यत इतियुक्ताद्द्वितीयेनिवाच्यंउत्पत्तिवाक्येविधिवत्साक्षात्कर्मणःकरणत्वावगतेः। अन्यथोत्पत्तिवा
क्येसाध्यत्वेनबुद्धस्यकर्मणःसाध्यंतरान्वेयत्वात्फलवाक्येपिकरणत्वेनस्यात्। तथाचाघाराग्निहो
त्राधिकरणेभाष्यकारेणवुरस्यते। नसकरणभूतोसौसाध्यंतरान्वेयत्वाद्वाक्यांतरेणापिफले
विधातुंशक्यतइति। तस्मादुत्पत्तावपिकर्मणःकरणत्वाद्द्वितीयानुपपत्तिः। अतोगुणविधिरितिप्रा
प्तउच्यते। अग्निहोत्रपदेनविधेयस्याग्निलक्षणगुणस्याग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंजु
होतीतिविहितमंत्रवर्णप्राप्तत्वादग्निहोत्रपदंनामधेयं। नचलुप्तचतुर्थ्यांमंत्रवर्णाद्दुर्बलीयस्त्वात्त
यैवदेवताविधिरितिवाच्यं। अविरोधेनबलीयस्त्वस्याप्रयोजकत्वात्। तस्यालुप्तेनाबोधक
त्वाच्चानचव्यधिकरणबहुव्रीहिःसंभवति। तस्यतात्पर्यज्ञानपूर्वकत्वेनविधावनुपपत्तेः। इंद्रइत्त इ
त्यादौतुतदंगीकारोनदोषः। मंत्रगतत्वेनानुवादत्वात्। तुभ्यमग्नयेहोत्रेद्रव्यामितिचतुर्थीतत्पुरु
षेणदेवताविधिरितिवाच्यं। तस्यप्रकृतिविकारभावएवविधानात्। अन्यथासइत्यादौतुषष्ठीत

त्पुरुष एवानुचषष्टीत त्पुरुषे गौणी वाच्यदेवताविधिः संभवतिः तस्य देवताबोधकत्वाभावात्। द्रव्य
[illegible]त्वेनाग्निसंबंधाभावाच्चा न चाग्निहोत्रमित्यत्र नाग्निर्देवता प्रातर्होमे विधीयतामि
तिवाच्यं। यत्सूर्याय च प्रजापतये चेति वाक्यस्य बाधापत्तेः। न च विशिष्टे पि चतुर्थी बहुव्रीह्यनुपपत्तिः।
तदर्थस्य प्रमाणान्तरा वगतत्वेनादोषात्। सामिधेन्यादिनामवदस्यापि नाम्नः प्राप्तिमात्रापेक्षत्वेनाव्य
त्यन्तत्वेपि दोषाभावाच्चा यदग्नये हे येच प्रजापतये च सायं जुहोतीत्यत्र तु मंत्रवर्णप्राप्ताग्निसमु।
च्चितः प्रजापतिरेव विधीयते। अग्निसमुच्चयविशिष्ट प्रजापतिविधानाच्चा वाक्यभेदः। न च के
वलाग्निदेवत्यमंत्रविधिपक्षे ज्योतिष्टुविशिष्टस्याग्नेर्देवतात्वान्मिश्रलिंगमंत्रविधिपक्षे च
सूर्यसहितस्याग्नेर्देवतात्वावगमाद्यग्नये च प्रजापतये चेति वाक्ये केवलस्याग्नेरनुवादान्न सं
भवतीति वाच्यं। त्वाष्ट्रं पात्नीवतमालभेतेत्यत्र विशिष्टस्य देवतात्वावगमेपि पर्यग्निकृतं
पात्नीवतमुत्सृजन्तीत्यत्रैकदेशानुवादवददोषादित्याचार्याः। सोमेश्वरस्तु चाष्यनुरोधान्मंत्र

५५

वर्णापेक्षया चतुर्थ्याः । प्राबल्येन यदग्नये च प्रजापतये चेत्यादिवाक्येनाग्निप्राप्तिः । न च वाक्यभेदः ।
गौश्चाश्वश्चाश्वतरश्चेत्यादिवाक्ये चकारेण समुच्चयविधानवद्देवताद्वयविशिष्टचार्थविधा-
नात् । न च यदग्नये चेत्यनेन देवताविधाने लिंगादेव केवलाग्निदेवत्यमंत्रप्राप्तेस्तद्विधायक-
शास्त्रवैयर्थ्यमिति वाच्यं । अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं जुहोतीति मिश्रलिंगमंत्र-
विधिपर्युदस्तकेवलाग्निलिंगकमंत्रप्रतिप्रसवार्थत्वादित्याह । तथा च शास्त्रकमते यदग्नये
चेतिवाक्येन केवलाग्नेर्देवतात्वावगमात्केवलाग्निप्रकाशकत्वं मंत्रयोः । आचार्यमते तु यदग्न-
ये चेत्यस्याग्न्यविधायकत्वेन मंत्रलिंगादेव देवताकल्पना मंत्रानुसारेण ज्योतिःशब्दविशिष्टाग्नेः
सूर्यसहिताग्नेर्वा सायंकालीनप्रधानाहुतौ देवतात्वं एवं प्रातःकालेपि मतद्भेदो द्रष्टव्यः । तस्मा-
त्सायं च प्रातश्च जुहोतीति यावज्जीवमग्निहोत्रं जुहोति । अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिविधी-
नां कालादिगुणसंक्रांतशक्तित्वादग्निहोत्रं जुहोतीत्यस्यैव कर्मविधायकत्वं । तत्र चाग्निहोत्रपदं

५५

नामधेयं। आधारवाक्येपि चतुर्गृहीतं वा एतदभूत् तस्याधारमाधार्य तिस्रः समिधोऽभ्यादधातीति यत् प्राचीनं प्रयाजान्यजतीति द्रव्यविधेरिदं रूर्ध्वाध्वर इत्याधारमाधारयतीति विहितमंत्रवन्नपापूर्वदेवता संवं धाय्याधारयतीत्यस्य सूक्तवाक्येन प्रस्तरं प्रहरतीत्यत्र प्रहरतीव यागलक्षकत्वं तथा च। आधारयतइत्याधार इतिव्युत्पत्त्या वृद्धस्य क्षरणसमर्थाज्यद्रव्यस्य चतुर्गृहीतमिति वाक्येन प्राप्तत्वादाधारपदं नामधेयं। यत्तु सौमिध्वरश्चतुर्गृहीतमिति वाक्ये द्रव्यं न विधीयते किंतु चतुर्जुह्वां गृह्णातीति विहितस्याज्यस्य यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदिति वाक्येन प्रयाजार्थत्वेन प्रयाजार्थत्वावगमाच्चतुर्गृहीतमिति वाक्येन प्रोक्षणादिवत्प्रयाजाज्यस्य क्षारणसंस्कारार्थत्वेन विधीयते किंतु चतुर्जुह्वां गृह्णातीति विहितस्याज्यस्य यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदिति वाक्येन प्रयाजार्थत्वावगमाच्चतुर्गृहीतमिति वाक्येन प्रोक्षणादिवत्प्रयाजाज्यस्य क्षारणसंस्कारार्थत्वेन विधीयते। तथा चार्थं चतुर्गृहीतस्याधारसाधनत्वमित्याह तन्न। चतुर्जुह्वामिति वाक्येनोत्पन्नस्याज्यस्योक्तवाक्यद्वयेन

प्रयाजाधारयोर्युगपद्विनियोगेन प्रयाजमात्रार्थत्वायोगात्। न च प्रयाजेष्वस्य इति तादर्थ्यं च तु ण्योः शे
षित्व एव प्राप्तेरस्तस्येति प्रयाजसंबंधस्यामान्यवाचित्वेन शेषत्वशेषित्वयोः प्राप्तेः संदिग्ध
मसंदिग्धेन वाध्यत इति न्यायात्संस्कार्यतापरत्वमेवेति वाच्यं। आधारस्यासंदिग्धप्रकरणेन दर्
शपूर्णमासार्थत्वे संभवति संदिग्धवाक्येन प्रयाजार्थत्वायोगात्। न चाधारस्य प्रयाजाज्यसंस्का
रत्वे प्रोक्षणादिवत्सान्निपत्योपकारकत्वे संभवति प्रकरणेन प्रयाजादिवदारादुपकारकत्वा
मन्याय्यमिति वाच्यं। अदृष्टद्वारा सन्निपत्योपकारकस्य आरादुपकारकस्य च अदृष्टार्थत्वाविशेषेण प्रब
लदुर्बलत्वाभावात्। दर्शपूर्णमासप्रधानांगत्वे संभवति अंगप्रयाजांगत्वायोगात्। यत्वाग्निहोत्राधारश
ब्दयोर्नामत्वे द्वितीयानुपपत्तिरित्युक्तं। करणीभूतस्यापि धात्वर्थस्यार्थसाध्यत्वात्साध्यत्वसाधनत्वयोरेका
र्थनिष्ठत्वात्स्रुक्संबंधगृहेण द्वितीयया साधनत्वलक्षणात्। तथा च साध्येनाग्निहोत्रेण भावयेदिति बोधः। ५६
एवं पार्वणो जुहोतीत्यत्रापि मंत्रवर्णात्पार्वणो देवतात्वप्राप्तेस्तत्प्रख्यन्यायेन पार्वणशब्दस्य नामत्वेन चमं

त्वघटेन नामावास्यादिशब्दघटितमेव देवदत्तात्ववुद्धेन पर्वशब्दघटितमिति न तत्प्रख्यन्यायइति वाच्यं।
नामत्वंसिध्यर्थं यथाकथंचिदर्थप्राप्तेर्विवक्षितत्वेन पार्वणावित्यत्र शब्दघटितदेवतात्वस्याविवक्षि
तत्वात्। यत्त्वाचार्यैरस्मिन्नधिकरणे यौगिकाएव शब्दा उदाहरणमित्युक्तं तत्र यौगिकशब्दः प्राप्ता
र्थकत्वाभिप्रायः। समिदादिसंज्ञानाम योगिकत्वेपि तत्प्रख्यन्यायेनैव नामत्वस्य वक्ष्यमाणत्वात्।
अत: समिदादिशब्दे ज्योतिरादिवद्योगेशक्तइतिकेचित्। अन्येतु शक्तिकल्पनायांप्रमाणाभावात्स
मिदादिपदं समिदादिदेवतावत्त्वं योगार्थलक्षणया प्रस्थापयतीति वार्तिकाभिप्राय इति वदंति। प्रयो
जने पूर्वपक्षे यदग्नये च इंद्रकुध्योध्वरइति वाक्यविहितकर्मणोरग्निहोत्राघारवाक्यविहितात्कर्मणो
भेदः। सिद्धांते त्वभेद इति। तद्व्यपदेशं च। श्येनेनाभिचरन् यजेतेत्यादौ श्येनादिशब्दा गुणविधयः।
कर्मनामधेयं वेति विचारः। तत्राधिकरणत्रयोक्तनामत्वसाधकहेत्वभावाज्ज्योतिष्टोमे गुणविधिः।
यद्वा गुणफलसंबंधः। काम्यत्वाच्च श्येनगुणेन नित्यसोमबाधः यद्वा गुणविशिष्टकर्मविधिः। प्रसिद्धार्थत्वा

५७

च्छेमा च र्थलक्षणानदोषः। न च क्रौर्ये शुरेण नृसिंहो देवदत्त इति गौणप्रयोगवत्। यथा वैरूप्येनोनिष्पत्त्या दत्त एव
मयं द्वितीयं तेनात्मसमादत्तेयमनिचरति रूपेनेनेति वाक्यशेषाद् द्वितीयनिष्पत्त्यादानकर्तृत्वलक्षणगुणयोगे
न रूपेण रूपेण शाब्दे योगे गौणौ स्त इति वा चेत्प्राप्ति वा धापते। वाक्यशेषस्य स्तावकत्वेनापि चारिता।
र्थ्यात्। न च पूर्वपक्षेऽपि मत्वर्थलक्षणांगीकारात्। भक्ति वा धोत्स्येवेति वाच्यं। लौहित्यस्य साधादिपदवद्
पसर्जनार्थे रूपे न विधायकत्वेन प्रकृत्य वा धादिति प्राप्ते ब्रूमः। गुणविधिपक्षे वाक्यशेषेण पुष्टीकृतत्वात्:।
न च तस्यात्मनो पमानं संभवति। न च गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं राम
रावणयोरिवेति वद् द्वेदृष्टप्रमीतिः संभवतीति वाच्यं। तत्र कल्पवल्लांडे नेदेन नेदकल्पनात्। न चात्र।
कल्पने संभवति। न चाविशिष्टविधिः। यागमात्रविधाने संभवति गौरवाद् योगात्। मत्वर्थलक्षणापत्ते
श्च येन शाब्दस्य यागेन गोनः। निष्पत्त्यादानकर्तृत्वाभावेन रूपेण साद्रूप्याभावात्। तस्माद्वाक्यशेषः रूपे
न शाब्दस्य यागस्य यागो प्राप्तिर्याहकर्म इति जीर्णाः। वयं त्वेवं चिन्त्यं गुणविधिपक्षे यागसाधनासाधनत्वात्सो

५७

जीवनसत्तावस्यान्न्यायाघ्रेण न चेदं मंगीकृत्योपमानोपपत्तेः। धाकाग्रोषेणयागे शादिग्रहस्यास्पष्टत्वात्।
विशिष्टविधिपक्षे श्येनपदस्य प्रसिद्धार्थकत्वेन गौरवमत्वर्थलक्षणांगीकारेप्यदोषाच्च। अतः समा
नमितरस्योनेनेत्युतिदेशानुपपत्त्या नामत्वं साध्यमिति वदामः। नामधेये गुणश्रुतेः स्याद्विधान
मिति चेत्। इह वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र किं वाजपेयशब्देन वाजं च तत्पेयं चेति तत्पा
यवागूलक्षणा गुणो विधीयते उत कर्मनामधेयमिति विचारः। तदर्थं च किमाख्यातस्योपजीर्गुण
फलाभ्यां तन्त्रेण संबध्यते उत नेति विचार्यं। यद्यपि चाप्रवृत्तिदधिकरणन्यायेनैवासिद्धांतो न विध्यति।
तथाप्यत्रत्य पूर्वपक्षिणा तदधिकरणसिद्धांतवीजस्य मत्वर्थलक्षणाया आक्षेपात्तत्प्रोनरुक्तेः अ
तउद्भिदादिवाक्यान्यपत्रोदाहरणं। तत्र यजेतेति यजिना यागस्य साध्यत्वं साधनत्वं वा न वोध्यते।
तद्वाचकप्रातिपदिकाभावात्। साध्यत्वबोधे वाजपेयादेरपि साधनत्वेन साध्यसाधनद्वयसमावेशायोगा
च्च। तस्माद्धत्वर्थसंबंधिनी भावनाकर्तव्येति प्राप्तबोधः। स च संबंधः कर्मत्वकरणत्वयोः साधारणः।

५८

तथा च भावनाया धात्वर्थकर्मकत्वमादाय द्रव्यस्य करणत्वं धात्वर्थकरणत्वे चादाय फलस्य कर्मत्वमिति मत्वर्थ
लक्षणाया अभावात् गुणविधिरिति पूर्वपक्षः यद्वा यागस्य प्रतियोगिभेदेन साध्यत्व साधनत्वयोरविरोधात् सा
ध्यत्वसाधनत्वेन युगपदुपस्थितिरिति न मत्वर्थलक्षणेति पूर्वपक्षः। सिद्धान्तस्तु। तद्धात्वर्थसंबंधस्य सा
मान्यतो बोधः संभवति। तद्वाचकषष्ठ्यभावात्। न च समभिव्याहारात्संबंधसामान्यबोधः। फलद्रव्ययोर्निष्ठ
योः कर्मत्वकरणत्वयोः संबंधविशेषापेक्षितत्वेन तदयोगात्। न चाध्याहारेण यागस्यान्वय्यान्वयः
विधावृत्तिं विना तद्योगात्। अतः यागस्यान्वय्यन्वयचायनत्वयोर्द्वयोरप्युपस्थितेर्वा न च युगपदुभयबोधो
विरोधात् न च प्रतियोगिभेदात्साध्यसाधनत्वयोरविरोध इति वाच्यं। तयोरविरोधस्य कालभेदेन व्य
तत्वेन प्राप्यात्तयोर्युगपदुपस्थितौ कालभेदानुपस्थिते विरोधस्यावश्यकत्वात्। एतेन कृतिसाध्यत्वमिष्ट
साधनत्वं विधिवाच्यमिति वदंतः परास्ताः। न च भावनायामिव सात्त्वर्थफलकरणयोर्युगपद्वत्त्व याद्वा
क्यभेद इति वाच्यं। भावनायाः सर्वकारकसाधारणत्वेन वैलक्षण्यात्। कारकाणां धात्वर्थेनान्वयाच्च।

५८

नचयथाराजाराजसूयेनस्वाराज्यकामोयजेतेत्यत्रवाक्यांतरविहितकर्मणांफलविधानंकर्मसुचराजक
र्तृविधानेवाक्यभेदंविनैवभवतित्तथात्रापिभवत्वितिवाच्यं।राज्ञःकर्तृत्वेनभावनायामेवान्वयात्तराज
विशिष्टकर्मोपादानेनवाक्यभेदपरिहाराच्च।नचात्रापिद्रव्यस्यभावनायांकरणत्वेनान्वयः।संभवति
यागस्याधिकरणत्वेनैकस्यांभावनायांकरणद्वयासमावेशात्।अतोमत्वर्थलक्षणांविनोभयविधानेआ
वृत्तिलक्षणोवाक्यभेदः।आवश्यंगीकारेपिचगुणस्यस्वाराज्यार्थयागेनसंबंधोनस्यात्।विधिद्वया
स्ययुगपत्प्रवृत्त्याप्रकरणस्यानिष्पन्नत्वात्।एवंगुणत्वप्रधानत्वविधित्वानुवादत्वोद्देश्यत्वोपादेयत्व
वृत्तौवैरूप्यलक्षणोपिवाक्यभेदोदुष्परिहरः।अपास्तत्वाद्विजिरूपंचद्वितीयाध्यायतृतीयपादेयांत्वा
धिकरणेकरिष्यते।सिद्धान्तेतुसोमेनयजेतेत्यत्रयागस्यैवद्रव्यस्यभावनाविशेषणत्वेनविधानाद्या
गेनपार्थिकसंबंधसिद्धेर्वैधत्रयस्यार्थत्वेनाप्राप्तत्वान्नविरुद्धान्तिकद्वयापत्तिरितिवैषम्यं।तद्धिदधि
करणप्रोषत्वाच्चास्याधिकरणस्यनप्रयोजनापेक्षातद्गुणास्तुविधीयेरन्नविनागाद्विधानार्थेनवेद

न्येन शिष्टः। इदानीं नामापवादसाधनेन विशिष्टविधिः साध्यते। यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्ण-
मास्यां चाच्युतो भवतीत्यादिवाक्येष्वाग्नेयादिशब्दः कर्मनामधेयं गुणविधिर्वेति संशयः। तद्रूपं च कि-
मवृतस्य रूपस्यायः। सं च भवत्युत नेति चिन्तायां तत्र भवतावदत्र पुरोडाशभवनं विधेयं प्रयोजकव्यापारस्ये-
व विधेयत्वेन प्रयोज्यव्यापारस्याविधेयत्वात्। नापि भवत्र्नाशिप्राद्व्यभावना विधेया अपूर्वार्थद्रव्य-
स्यासंभवात्। अतो यथाग्निहोत्रं जुहोतीत्यत्र करणमात्रविशिष्टभावना विधेया नाग्नेस्तस्यान्ना-
ष्टाकपालरूपेतिकर्तव्यतामात्रविशिष्टभावना विधेयते नाग्नेः। कर्मविनियुक्ताग्निसंबंधेत्यादिया-
ज्यानुवाक्यातोऽग्निप्राप्तेः। विशिष्टयागविधिस्तु गौरवादेवायुक्तः। किं गौरवमिति चेत्। अत्र जीर्णावि-
शिष्टतामेनेव विशेषणज्ञानं विशिष्टविधिनापि विशेषणविधिः कल्प्यत इति गौरवमाहुस्तत्र। विशि-
ष्टविधौ विशेषणविधेः कारणत्वाग्रहात्। अन्ये तु यागांशे पूर्वं विधेर्द्व्यांशे च नियमविधेर्वैरूप्यापा-
त्या विशेषणविधिकल्पनं। यत्र बहुधाध्यायेपार्थ्ये सारण्यपिना स्वर्गाद्युपायत्वेन दानादीनां साधन

प्राप्तौ यागनियमः इत्यत्र कं तत्रावित्यं । अदृष्टद्वारकसाधनत्वस्य लोकादप्राप्तेरित्याहुस्तदपि न । अदृष्टा
वाप्यये विशिष्टविधौ विशेषणयोरुभयोरपि नियमादृष्टस्यापत्त्याभावेन विशेषणविधिकल्पनापत्तेः । य
तुराणके विशिष्टस्यातिरिक्तत्वाद्विशिष्टविधौ विशेषण[illegible]विधिकल्पनात् गौरवमित्युक्तं ।
नन्तविशिष्टस्यातिरिक्तत्वे प्रमाणाभावात् तदंगीकारेपि लाघवान्नैव विवक्षितानुष्ठानासिद्धेर्वि
धिद्वयकल्पनवैयर्थ्यापत्तेश्च । विशिष्टस्यातिरिक्तत्वे वद्दत्तोवि । वरणाचार्याणां तत्वमस्यादिवाक्ये जह
ल्लक्षणामात्रापत्त्या स्वीकृतजहदजहल्लक्षणोच्छेदापत्तिः । तस्मादनेकविधिकल्पमेव विशिष्टविधौ
गौरवमितियुक्तं पृथ्वा । तस्माद्धात्वर्थादिपरतामेति पूर्वपक्षः । अत्रोच्यते । धात्वर्थानुरागं विनाना
वनाविशेषणानन्वयाद्विशेष्यत्वापि धात्वर्थजननं विनाभावनाविशेषणत्वायोगाच्च द्रव्यविशिष्टभाव
नाया अविधेयत्वानास्यविधि[illegible]माख्यानेनमेव विनियोगान्वाधान् । नाग्निप्राप्तिः । न चाग्न्याक
पालोयागेन हविर्[illegible]गोपास्थितत्वाक्रमख्यानेस्यात् । अग्निहोत्रवाक्येतु देवतानि

धायिमेन्द्रयोगात्सौर्यहोमस्य वरुणदेवताप्राप्तिरिति विशेषः। तस्मादाग्नेयपदवदुद्देवतासंबंधेनैव
यागो लक्षयितव्यः। न च सर्वत्रापि नित्यलिङ्गोऽग्वक्तव्य इति स्मर्तव्यं। तेनाग्निसंबंधमात्रेणाग्नेयपदप्रसिद्धे
नैतस्य देवताबोधकत्वमिति वाच्यं। संबंधसामान्यस्याविधेयत्वादाग्नेयपदवैयर्थ्यापत्तेः। अग्नेः
पुरोडाशेन देवतात्वातिरिक्तसंबंधान्तरासत्त्वात्। ऐन्द्रदध्यानायाः सांनाय्यामित्यादौ देवतालक्षित
स्यावश्यकत्वाच्च। तस्मादाग्नेयपदं गुणविधिः विशिष्टविधिर्गौरवं त्वनन्यगतिकामिति न दोषः।
प्रयोजनं पूर्वपक्षे अनन्यप्रयोजनत्वेन यागनीशौमीयादिनाम्नात्कर्मसंकल्पः। दर्शपूर्णमाससंज्ञायाः
समे दर्शपूर्णमासाभ्यां यजेतेत्यादिगुणविधानोपयोगेनापि सार्थकत्वात्। सिद्धान्ते नेति। व
हिराज्ययोरसंस्कारे प्रयुक्तानादतक्षः। कर्मनामधेयप्रसंगाद्वा नामविचारः क्रियते। व्रीहि
रोज्यपुरोडाशप्रोक्षणादिः। किं संस्कारवचनाः उत जातिवचना इति संशयः। तत्र तेषां संस्कृतेष्वेव यौ
लिकप्रयोगात् शास्त्रस्थानादिति मितत्वादित्यायेन यूपादिशब्दवत्संस्कारवाचित्वं। यस्तु व्रीहि

रादायगावोगता आज्यंरूपंपुरोडाशोनमेमालाप्रहेलवंददातितिलोकेजातिमात्रेप्रयोगः सयाज्ञिकप्रसिद्धिवि
रोधेनाप्रमाणमितिप्राप्तेब्रूमः। याज्ञिकेष्वपिजातिमपहायैतेषामप्रयोगेणलोकविरोधाभावाज्जातिवाचिता।
मंत्रेषुयाजिकानामपिजातिमात्रेप्रयोगःस्यादितिवाच्यं। सर्वेषांसर्वत्रप्रयोगस्यानावश्यकत्वात्। अन्यथा
केनाचिद्दृष्टंघटशब्दप्रयोगेतस्यजातिवाचित्वाभावापत्तेः। एवंचव्रीहिरादिशब्दानांलोकतःशास्त्रेत्वा
च्चाद्व्रीहित्वेनाव्रीहीत्यादिविधीनांनशाकिकल्पकत्वान्निविषाति। प्रयोजनंपूर्वपक्षेसमूलंव्रीहिर्नवतिशारम
येव्रीहिर्नवातित्वारावपिलवनादिकार्यंतरसमयेपिचपुरोडाशेवघातादि। तथाकुशाघतंनिन्तमपिनल
पोदकादिव्रीहिराज्यस्थानेग्राह्यंमन्मयोपिचपुरोडाशः। सिद्धांतेनेति। प्रोक्षणीष्वर्थसंयोगात्। प्रोक्षणी
शब्दःकिंसंस्कारवचनमुतजातिवचनमुतसर्वद्रवद्रव्यवचनमितिसंशयः। तत्रयाज्ञिकानांसंस्कृतद्रव्ये
प्रयोगात्संस्कारवचनमित्येकःपूर्वपक्षःप्रोक्षणीर्निरस्यहूजितास्मइतिलोकानामप्सुप्रयोगात्पूर्वाधिकर
णन्यायेनजातिवचनमित्यपरः। सिद्धांतस्तुप्रोक्षणतेयानिस्ताइतियोगाद्द्रवद्रव्यमात्रवचनः। अवयवश

६१

स्यैव चारितार्थ्ये शक्त्यंतरकल्पनस्यायोगात्। रूढिर्योगमपहरतीति न्यायस्तु यत्र शक्तिः सिद्धा तद्विषयः। प्रयो
जने संस्कारवाचित्वे पत्नीप्रोक्षणं नवतीत्यत्र प्रोक्षणीरासादयेत्यस्यानूहः। जातिवाचित्वे पत्नमासादये
त्यूहः। यौगिकत्वे प्रोक्षणमासादयेति। ननु संस्कारवाचित्वेपीकारस्य प्रत्तान्निवृत्तिस्याप्रकृतावप्रमाना
धिकरण्युक्तत्वाज्ञानात्। यौगिकत्वेतु योगेन रमीकारस्यागतत्वान्न प्रयोगः। तथा निर्मथ्येनेनिर्मथ्यश
ब्देपि यौगिकप्रयोगात्संस्कारवाचित्वमित्येव पूर्वपक्षः। निर्मथ्यमानयमुस्यामहइत्ययाज्ञिकानां मथना
जम्मैप्यग्नेः प्रयोगाज्जातिवचनत्वमिति द्वितीयः। शक्तिकल्पनस्यायुक्तत्वात्पूर्वाधिकरणन्यायेन यौगि
कइति सिद्धांतः। अन्यत्राधिकरणेवैयर्थ्यं मथनजन्याग्निपरंपरायामाघस्यैव मथनजन्यत्वेन द्वितीयादे
र्निर्माथ्यशब्दप्रयोगानुपपत्तेः। शक्तिकल्पनस्यावश्यकत्वेन पूर्वपक्षाधिकरणात्। सिद्धांतस्तु नमथनज
न्यत्वं निर्मथ्यशब्दप्रवृत्तिनिमित्तं किंतु मथनप्रयोज्यत्वं तच्च मथनव्यतिरेकप्रयुक्तव्यतिरेकप्रति
योगित्वं तच्च द्वितीयाग्नौ लिंगसमवायेन प्राणन्त्रत्युरवानिर्मथ्यशब्दे गौण इति वाच्यं द्वितीया

६१

धानिकाले पूर्वं पूर्वोग्न्यनावात् प्रयोजनं संस्कारवाचित्वे निर्मंथ्येनेष्टकाः पचंतीत्यत्राहवनीयादेर्ग्रहणं।
जातिवाचित्वे यस्य कस्यचिदग्नेः यौगिकत्वे त्वाचिरमथिताध्वर्युमथितेष्टकापाके दग्धमाथितस्यानुत्पत्ती
र्निर्मंथ्यशब्दस्य योगे अचिरान्निष्पन्नत्वादेः प्रवेशान्मथनाप्रयोज्यत्वाग्न्यग्नेरेवव्यावृत्तिः स्यान्नाचिरम
थितादेरिति चेत्। न। पाकविधानस्यानुपपत्त्यैवाग्नेः प्राप्तत्वान्निर्मंथ्यशब्दे नलोहितोष्णीषा इतिवद्विधे
यत्वाच्च तन्मथनमेव प्रधानपाकसमानदेशकालकर्तृकं विधीयत इति तिष्ठतु तावत्। वैश्वदेवे विकल्प इति
चेत्। चातुर्मास्येषु प्रथमे पर्वणि आग्नेयमष्टाकपालं निर्वपेत् सौम्यं चरुं सावित्रं द्वादशकपालमित्यष्टौ
यागान्विधाय श्रूयते वैश्वदेवेन यजेतेति। तत्र संशयः किं वैश्वदेवशब्दः पूर्वयागेषु देवताविधायकः किं
वा वैश्वदेवशब्दः। पूर्वयागेषु देवताविधायकः किं वा वैश्वदेवे वा वैश्वदेवयागस्य समुदायस्य लिंगसमवायि
न नामधेयमिति पूर्वाधिकरणे यौगिकनिर्मंथ्यशब्दस्य विधायकत्वमुक्तं अत्रापि यौगिकवैश्वदेवप्र
वृत्तिरस्ति न वेति विचारात् संगतिः। तत्र नामत्वपक्षे वाक्यवैयर्थ्यापत्तेर्गुणविधित्वं। न च वसंते वै

६२

श्वदेवेन यजेत प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यादिगुणविधानार्थं नामधेयोपयोगात्सार्थकत्वमिति वा
च्यं। विश्वेदेवदेवत्ताकामिक्षायागमात्रेपि वसंतादिविधिसंभवात्। न च यागांतरविधायकमेतद्वाक्य
मिति वाच्यं। द्रव्यान्तावेनारूपत्वापत्तेः। सर्वस्मै वा एतद्यज्ञाय गृह्यते यत्ध्रुवायामाज्यमित्यस्य दर्श
पौर्णमासीकयागविषयत्वात्। अनादिष्टाज्यविधेः सौत्रपरिज्ञोषात्वान्मूलापेक्षात्वेनाप्रामाण्या
च्च। न च यागविधानान्यथानुपपत्त्यैव द्रव्यप्राप्तिः आज्यपयःपशुपुरोडाशादीनि यत्तद्रव्यग्रहणाप
त्याप्रकृत्यनियमेन धर्मसंदेहापत्तेः। यत्तु द्रव्यं कल्पं विकल्प्येत देवताभुनल्यन्त इति पौर्णमास्य
धिकरणे उक्तं तत्रार्थापत्त्या द्रव्यप्राप्त्यत्निप्रायें किंतु सर्वस्मै वा इत्येतद्वाक्यविहिताज्यप्राप्त्यभिप्रा
यं अतो द्रव्यनियमं विना अरूपत्वापत्तेः। तस्माद्गुणविधिः पूर्वयागेषु न चोत्पत्तिशिष्टगुणविरोधः।
आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेनोत्पन्नशिष्टस्यापि बलीयस्त्वात्। वाजिभ्यो
वाजिनमित्यत्र तु द्रव्यदेवताश्रवणाद्यागांतरविधानेन सार्थकत्वान्नानर्थक्यप्रतीघातः। न च

६२

123

वैश्वदेवशब्देन सप्तसु प्रकृतयागेषु देवता विधीयते। आमिक्षायागे चानूद्यत इति विरोध इति वाच्यं।
प्रकृतत्वेन सर्वयागोपस्थितावपि यत्राप्राप्तिस्तत्र विधिपर्यवसानात्। न चात्र पूर्वाधिकरणेन नाम
त्वसिद्धिः। मत्वर्थस्य तद्धितेनोपादानादुद्भिन्न्यायाप्रवृत्तेः। अनेकार्थविधिप्रसङ्गाभावेन चित्राधिकरणन्या
याप्रवृत्तेः। सप्तसु कर्मसु विश्वेदेवाप्राप्त्या तत्प्रख्यन्यायाप्रवृत्तेः। दर्शितप्रतिपादकवाक्यशेषाभा
वेन तद्व्यपदेशन्यायप्रवृत्तेश्चेति प्राप्ते ब्रूमः। नात्र यागानुवादेन गुणविधिः। उत्पत्तिशिष्टगुणावरो
धात्। उत्पत्तिशिष्टस्य च बलीयस्त्वं प्रथमावगतत्वात्। न च वाक्यानर्थक्यं अनेकयागसमुदायीकर
णेनार्थवत्त्वात्। तत्प्रयोजनं च वसन्ते वैश्वदेवेन यजेतेत्यादिर्गुणोपबन्धः। अतो यागसमुदायैकदेशे
विश्वेषां देवानां देवतात्वप्राप्तेस्तत्प्रख्यन्यायेन नामत्वं प्रयोजनं पूर्वपक्षे वैश्वदेवानामानन्तकर्मसं
कल्पः सिद्धान्तेनेति। पूर्ववत्तो विधानार्थास्तत्सामर्थ्यं समाम्नाये ... विगुणविधित्वं निराकृतं ... वि
न्नामधेयत्वे तत्प्रसंगादिहोच्यते निराकृत्यार्थवादत्वं साध्यते। वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे

६३

जातेइत्युपक्रम्यश्रूयतेयदष्टाकपालोभवतिगायत्र्यैवैनंब्रह्मवर्चसेनपुनातियन्नवकपालोभवति
त्रिवृतैवास्मिंस्तेजोदधातियद्दशकपालोभवतिविराजैवास्मिन्नन्नाद्यंदधाति।यदेकादशकपालो।
भवतित्रिष्टुभैवास्मिन्निन्द्रियंदधाति।यस्मिन्जातएतामिष्टिंनिर्वपतिपूतएवसतेजस्व्यन्नादइं
द्रियावीपशुमान्भवतीति।तत्रकिमष्टाकपालादिशब्दःप्रकृतवैश्वानरयागस्यनामधेयमुततत्रैव
गुणविधिस्तद्विशिष्टकर्मविधिरथवागुणफलसंबंधोऽथवार्थवादइतिविचारः।तत्रद्वादशाकपा
लेऽष्टाकपालादेःप्राप्ते द्वादशसंख्यायांवाऽष्टत्वादेःप्राप्तेयागनामधेयं।एतानितेषांयागनामत्वेया
गसामानाधिकरण्याभावात्पुरोडाशेपुरोडाशांतराभावेनद्वादशकपालपुरोडाशेऽष्टाकपालादेर
प्राप्तेश्च।नचद्वादशसंख्यायामष्टत्वप्राप्तिः।तस्यतत्रसत्त्वेपिचतुष्ट्वसापेक्षत्वेनापरिच्छेदकत्वा
दष्टाकपालइत्यादिसमासतद्धितानुत्पत्तिप्रसक्तेः।तस्मादष्टाकपालादिर्वागुणःपूर्वयागेवि।
धीयते।नचोत्पत्तिशिष्टद्वादशकपालावरोधात्तदसंभवः।उपक्रमोपसंहाराभ्यामेकवाक्य।

६३

त्वावगतेः सर्वेषामुत्पत्तिशिष्टत्वात्। अथवा नित्यवाक्यत्वेपि यत् द्वादशकपालो विधीयते। उ
पक्रमेत्वन्यतः इति सर्वेषामुत्पन्नशिष्टत्वं यत्तु वैश्वानरपदानुषंगात्सर्वेगुणविशिष्टकर्मविषयः।
यदुक्तं सर्वेगुणफलसंबंधाः। काम्यत्वादेषामुत्पत्तिशिष्टगुणबाधकत्वं द्वादशत्वस्य वसंयोगपृथ
क्त्वात्कर्मान्तरत्वमपीति प्राप्ते ब्रूमः। सर्वेष्वेतेषु पक्षेषु वाक्यभेदः प्रसज्यते। समभिव्याहृतेष्वेकवाक्य
मेतत्प्रतीयते। उपक्रमोपसंहाराभ्यामेकवाक्यत्वप्रतीतेः। तत्पक्षेषु विधेयभेदेन तद्बाधः स्यात्। निर्व
पतिना च द्वादशकपालविधिः स्पष्टः। अन्येषां तु वर्तिनाकल्प्यः। न चोद्देश्यसमर्पकं पदमाचाख्यायेन
तदनुवादेन गुणविधिः स्यात्। न च वैश्वानरपदानुषंगेण तल्लाभः। प्रथमांतस्याहुतीयांतेन सामा
नाधिकरण्यायोगात्। एतावत्कत्वेनाप्यपपत्तेरनुषंगवाक्यभेदयोरयोगात्। द्वादशकपालावयव
ष्वयोष्टसु कपालेषु श्रुतः सोष्टाकपालपुरोडाशसादृश्यात्सैव त्वाष्टाकपालप्राप्तेनाच्युते। एवं न
वकपालादिशब्दोपि। द्वादशकपाले कृते वृत्तवचसादिफलकाः अष्टाकपालादयोप्यवयवाः कृताः।

६४

न्वंतीत्यवयविश्रुतिः।नचयद्द्वादशाकपालोन्वतीत्यनेनैवद्वादशकपालस्यस्तुतत्वात्यदष्टाकपालो
न्वतीयस्यवैश्वानरंस्यादेनेतस्तावकत्वमितिवाच्यं।यद्द्वादशाकपालोन्वतीत्यस्यवैश्वानरंद्वादशाक
पालंनिर्वपेदित्यस्यानंतरमध्यवणात्।स्तुतेरपरिमाणत्वाच्च।तस्मादर्थवादःयास्मिन्जातइतिवा
क्योक्तंतुफलमेव।नचनिमि।तफलयोःसंदेहेवाक्यभेदइतिवाच्यं।फलनिमित्तयोरकेनरूपेणान्वा
यनायामसंबंधादेकसंबंधेनेतराकांक्षानपायात्।निमित्तस्यान्वयित्वेनन्वावनायामसंबंधाच्च।
अतएवदशमत्ततीयपादेयदिसोममपहरेयुरेकांगांदाक्षिणांदद्यादित्यत्रनिमित्तदाक्षिणान्वयो
देशिनगोरेकत्वंविधीयतइतिवक्ष्यते।तथाचयत्रानेकस्योद्देश्यस्यैकेनसाध्यत्वनिमित्तत्वादिना
रूपेणन्वावनायांसंबस्तत्रैकसाध्यादिसंबंधेनेतरसाध्याद्याकांक्षायाअपायात्तद्भेदःकृतोवा
क्यभेदः।यथागोदोहनेनपशुकामस्यप्रणयेदित्यत्रपर्वपक्षिणोक्तेकत्वपक्षेप्रणयनस्यपशुफल
स्यचसाध्यत्वेनसंबंधे।यथावासर्वेभ्यःकामेभ्योदर्शपूर्णमासावित्यत्रसर्वपदोक्तनानाफलानां

६४

127

साध्यत्वेन संबंधेयदुपन्नातिरण्हातिप्रयाजानूयाजेन्यस्तादिस्यत्वत्तदेश्यपदद्वयस्यैकेन साध्यत्वरूपेणसं
बंधेप्युद्देश्यतावोधकचतुर्थ्यान्तद्देश्यपदद्वयोपर्युत्पत्तेरैरैकैकस्य साध्यत्वेनान्वयस्यैकेननैराकांक्षा।
न्नावादुन्नयोरप्युगपत्साध्यत्वेनान्वय इति न वाक्यभेदः। यत्तु केचित्राहुर्ह्यान्तेषूयमाणस्वतु।
र्थ्याप्रत्येकमन्वयेन न्नाव्यनेदावगते वीक्यभेद इत्याहुस्तदानिविजेन्निते। दृष्टान्तविचारे:प्रत्ये
कंसंबंधेदृष्टवोधितसाहित्यवोधापत्तेः। उद्देश्यविशेषणत्वेतत्तदविवक्षांगीकारे सर्वैपुन्नतस्य
विकल्पे प्रयाजानूयाजास्यतरार्थत्वापत्तिः। अतः प्रजोयोनूयाजानां साहित्यविशिष्टस्यानाम प्रा
प्तत्वात्साहित्यानुवादासंन्नवेन साहित्यस्याप्राप्तोद्देश्यविशेषणत्वाद्विवक्षान्नवत्यवान्तद्देश्यप्रा
प्तित्तयापि दृष्टान्ते साहित्यस्याप्राप्तिपदिकेनोक्तत्वाद्विवक्षासिद्धिः। ग्रहविशेषणैकत्वंतु न प्रा।
तिपदिकेनोपात्तमितिवैषम्यं। सर्वस्यचोपन्नतस्य प्रयाजानूयाजोन्नयार्थत्वेनाविनियोगेपिस
मंस्यादष्युतत्वादितिन्यायाद्विनागासिद्धेन सर्वस्योन्नयार्थात्वदृष्टान्ते ष्वूयमाणमितिन्यायस्तु

128

६५

विनाशोनिन्नविषयः।तस्याःपदनावाल्पायअनूद्देश्यद्रव्यस्यविधेयत्वेनैकत्वावगमासंभवेधेयप्पायदा
नेयोष्टाकपालोमावास्यायांपौर्णमास्यांचाच्युतोभवतीतितत्रोद्देश्यकालद्वयस्यकालत्वेनैको।
नरूपेणान्वयसंबंधेपि।अनुवाद्यविशेषणस्यैवाविवक्षितत्वाद्वच्चप्राप्तोक्तसमुच्चयस
अनुवाद्यविशेषणत्वाच्चोद्देश्यविवक्षितत्वेनसमुच्चितयोरेवोद्देश्यत्वावगतेर्नैवा
क्यभेदः।अतएवोत्पत्तिविध्यन्तेदार्शनपयागयोर्नेनेदइतिपार्थसारथिः।सोमेश्वरस्तु
वाक्यैकत्वेपिप्रितत्वस्यएकास्मिकर्णेमंप्यानी
वेशात्कर्मभेदस्तथैस्त्वेएकास्मिकर्मणिकालद्वयस्यानिवेशात्कर्मभेदइत्याह।यत्रत्वाप्येकमु
द्देश्यंविधेयमपरंचाविधेयंयथावाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेतेत्यत्रवाजपेयमुद्दित
रकालीनत्वोच्चयोद्देशोपिएकरूपेणोद्देश्याज्ञावान्तथाकालेनेदः।कर्माकांक्षावशेनैकोद्देः।
श्यान्वयेपिइतरोद्देश्याकांक्षानपायादितिकाञ्चित्तन्त्ता।आकांक्षासत्त्वेपितन्त्रयोद्देशोवि

६५

ध्याहृतिरुक्तवाक्यान्तरेयपरिहारात्। अत एवाधाराग्निहोत्राधिकरणे आचार्यैरग्निर्ज्योतिर्ज्योतिरग्निः स्वा
हेति सायं जुहोतीत्यत्र कालहोमान्वयोद्देशेन मन्त्रविधाने वाक्यभेदात् सायंपदेनैव सायंकालीनं होमं लक्षयि
त्वा मन्त्रो विधीयते। जुहोतिस्तु प्रत्ययानुग्रहमात्रार्थ इत्युक्तं। तस्माद्वाजपेयपदवाक्ये वाजपेयपदमध्याहार्यं वा
क्यभेदः परिहर्तव्यः। श्रुतपदान्यामेवोमुद्देश्यपदस्य समर्पणे वाक्यभेदांगीकारात्। अन्यथा यदाज्ञेयो वाक्यपा
नद्वति वाक्येऽपि आमेयपयामेन किं चित्स्वर्वयेदित्यध्याहारकल्पनाकालोद्देशाच्च वाक्यभेदः स्यात्। न च वा
जपेयपदस्यैवाध्याहारे किं प्रमाणमिति वाच्यं। एतस्य च वैयर्थ्यवादस्तुत्यत्वेनाप्युपस्थितायाः प्रतिष्ठायाः
फलत्वस्यं कल्प्यते न चाकाङ्क्षविशेषणत्वेन वाजपेयस्यैवोपस्थितत्वात् तद्बोधकमेव पदं कल्प्यते न च
राद्धिसत्वे प्रतिष्ठासंवीति विपरिणामे प्रतिष्ठाप्राप्तः नाप्यत्वं च न वती। नोपस्थितिमात्रेणेति वाच्यं। वि
परिणामस्य मुख्यमुपस्थित्यावभावात्। यत्तु सोमेष्विरेण बृहस्पतिसवस्य प्रकरणाद्वाजपेयांगत्वमित्यु
क्तेमव संस्थायाम् पौर्णमासीमध्यमनु निर्वपतीति वाक्यविहितस्यैवैमध्यस्यापि प्रकरणात् दर्शपू।

६६

र्णमासेष्टयं गत्वापतेः। पौर्णमासीमिति द्वितीयायाञ्चेद्रूपपरत्वे कालस्याप्युद्देशेन वाक्यभेदापत्तेश्च।
जातेष्टं। वा केतु वैश्वानरं द्वादशकपालं निर्वपेत्। य द्वादशकपालोपदेशेनोपक्रमोपसंहारयोरैक्येनावाव
त्वयं तस्मिन्नेव वाक्ये तेति यस्मिन्जात इति वाक्यस्यानित्तवाक्यत्वेनैव फलपरत्वं। नचावयस्मिन्जात
इत्यनेन निमित्तत्वबोधः। पुत्रे जाते इत्यनेन यापूर्वनिमित्तत्वस्यानुवादात्। अत एवाच्चार्यैः पुत्रे जा
ते यस्मिन्जात इत्येतावत्पर्यन्तोपक्रमोपसंहारौ दर्शितौ। चानुपूर्विकत्वाच्चैवं। नचयस्मिन्जात इति वाक्ये
पि पूतत्वादिफलं चेदष्टाकपाले इत्यादि वा चेत् पूतत्वादिरूपं च फलविशिष्टपुत्रवत्त्वस्यैकस्यैव त्वाप्यत्वा
त्। तत्तद्विजातीसारूप्यप्रसंगान्ताम लिंगसमवायाद् इति गुणाश्रयाः। अत्रापि पूर्वाधिकरणव ।
न्नामधेयत्वगुणविधित्वनिराकरणेनार्थवादत्वं स्थाप्यते। गौणवृत्तिनिरूपणं त्वनन्तदधिकरणे
ऽर्थवादत्वस्थापनार्थं यजमानः प्रस्तरो यजमान एककपाल इत्यत्र सामानाधिकरण्यात् प्रस्तरश
ब्दो वा यजमानस्य नामधेयं यजमानशब्दो वा प्रस्तरस्य। तत्त्वं च परस्परकार्यकरणमित्येवं पू

६६

वैपक्षः। द्वितीयस्तु गुणविधिरेवायं तत्रापि योहोतासोध्वर्युरित्यादिवद्यजमानः प्रस्तरकार्ये स्रुग्धा
रणादौ विधीयत इति। सिद्धांतस्तु गुणविधित्वे सूक्तवाकेन प्रस्तरं प्रहरति एककपालं सर्वहुतं करोती
तिवाक्यान्न्यायं यजमानस्य प्रहरणे सर्वहोमप्राप्त्या यजमानो विस्रुक्रमात्क्रमतीत्यादिविधिबाधापत्ते
रर्थवाद इति। सर्वोन्नर्हित यजमानसदृशत्वात्प्रस्तरो वीहि षड्‌ परिसारयितव्य इति स्वर्गत्व संस्तु
ते चाहवनीये एककपाल आरोपिते यजमान एव स्वर्ग आरोपितो भवतीति स्तुतिः परशाद्स्यत्वप
रत्वं वा तिगौणत्वाल्लक्षणाया असंभवात्। न चाहि शाकसंबंधो लक्षणेति वार्त्तिकाः। अविनाभा
व इति चेद्रः। अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणते
ति वार्त्तिकात्। यदि शाक्यसंबंधमात्रं लक्षणं स्यान्तशाक्याविनाभावे तर्हि नो घृतमादित्यमीप्से दित्यत्र
शाकेलक्षणाभावसंबंधेन च निमीलनस्य उद्घृत्यादावपि लक्षणापत्तेर्नशाक्याविनाभूतो मीप्सणासं
कलो लक्ष्येत। अविनाभावस्यातिप्रसक्तधर्मेणेति न तिप्रसक्तासंबंधेन चद्रेयः। अभ्यापाधरपदा

६७

देरतिप्रसक्तप्रमेयत्वाभिधेयत्वादिधर्मेणातिप्रसक्तकालिकादिसंबंधेन वा विनाभावघटादिप
देन पटादिलक्षणापत्तेः। मेघाच्छन्नोंऽशुरितिवत्। प्रविशंतीत्यादौ च मंचकुंतानां संयोगसंबंधेन ता
त्कालिकपुरुषाविनाभावात्स्वलक्षणोपपत्तेः। यद्वा त्र गौण्येव वृत्तिः। वार्तिके उक्तप्रयोजनेः। मादृशं
च पुरुषेषु मंचदेशास्थितत्वेनैकगृहप्रवेशप्रयोगित्वं च ज्ञेयं। अतो यत्र नाभेलक्षणो [illegible] तत्रा
विनाभावाभावेन लक्षणापरं गौण्युपनिपायं ज्ञेयं। लक्ष्ये च शक्यस्यैव विशेषणत्वेनान्वयं पूर्वोपस्थि
तेः। यद्वा तीरत्वविशिष्टं तीरं लक्ष्यते। न चैवं यमुनातीरमपि लक्ष्येतेति वाच्यं। तत्र शक्यगंगासंबं
धाभावात्। गौणवृत्तिस्तु लक्ष्यमाणगुणसंबंधरूपा तद्रूपात्वादेव चास्या गौणी। तेन माणसिंहो देवदत्त
इत्यादौ चोक्तयोः क्रौर्यादेरुत्कृष्टकगुणसंबंध उतिकेचित्तन्न परगुणानां परत्रासंभवादिति लिंगपा
दस्य वार्तिकविरोधापत्तेः। अतो लक्ष्यमाणगुणसजातीयगुणसंबंधाद्गौणी वृत्तिः। काकेभ्यो द
धिरक्ष्यतां छत्रिणो गच्छंतीत्यत्र तु लक्ष्यमाणस्योपघातकत्वस्य छत्रिसार्थवर्तित्वस्य च गुणस्य

६७

योगारूढेणीरतिः । यत्तु केचित् लक्षितलक्षणामत्र लक्षितत्वोत्पत्त्वे गौणी न भवति अलक्षितेणो गतलक्षत्ती त्यपि
गौण्यापत्तेरित्याहुस्तन्न । तादृशप्रयोगे पयस्तेः पाणौ न तामल्पत्वेपि गौणत्वं गीकाराच्च । ननु सिंहो देव
दत्त इत्यादौ देवदत्तानुवादेन सिंहकार्यकारित्वं विधेयं न च तत्त्वं संभवति देवदत्ते क्रौर्यसंबंधरूपायागौ
णवृत्तेः सर्वमज्ञानात् अज्ञाताया वृत्तेर्बोधाजनकत्वादिति चेन्न । ना क्रौर्यदेवदत्तसंबंधस्य क्रौर्यसं
बंधत्वेन सिंहादौ ज्ञातस्य वृत्तिज्ञानविषयत्वं । क्रौर्यदेवदत्तसंबंध त्वेन वाक्यार्थत्वे तत्र दोषात् । न च सिंह
पदात् लक्षणया गौणी न्यां क्रौर्यदेवदत्तयेन्नोने युगपद्वृत्तिद्वयविरोधः स्यादिति वाच्यं । लक्षणायां शक्ते
रिव गौण्यां लक्षणाया उपायत्वेनादोषात् । यत्तु जीर्णा आरोपितार्थे वृत्तित्वं गौणत्वमाहुस्तन्न । ल
क्षणायामप्यारोपापत्तेः । अपतत्र शाकासंबंधेन लाक्षणिकसत्त्वेनारोपासंभवाच्च । न चाहार्यारोपो
पिकल्पयितुं शक्यः सादृश्यप्रतीत्यैवोपपत्तेः । ननु खपुष्पं भवतीति सिद्धांत इत्यादौ नारोपं विना गतिरास्ति
अभिधेयाभावेन तद्धर्मेकृतसादृश्यासंभवादिति चेन्न । अभिधेयाभावे तद्रूपारोपस्याप्यसंभ

134

६८

बात्। खपुष्पस्यारोपितत्वेन खपुष्पेपि खपुष्पशब्दस्य गौणत्वापत्तेश्च। अतो यथा पुष्पैरवोत्पन्नत्वं
खेवा पुष्पशब्दे नैव खाधार पुष्पशब्दे नैव खाधार पुष्पाभाव प्रतीतेर्नास्ति शब्देनुवादः। यद्वा येन
खं पुष्परहितत्वेन नावधारितं तस्य राजपुरुषादिवत् खस्य खपुष्पयोः संसर्गानुसंधानं वार्यते।
यद्वा खेललतागलपुष्पाधारत्वं नास्ति यद्वा पुष्पैरवाधारकत्वं नास्तीत्यर्थः। एवं शशविषाणादि
शब्देपि ज्ञेयं। जातिः। अत्राग्नेयो वै ब्राह्मण इति नोदाहरणं। अग्निदेवताकत्वेन ब्राह्मणे आग्नेयपद
स्य मुख्यत्वात्। अतोग्निर्वै ब्राह्मण इत्युदाहरणं। अग्नेर्ब्राह्मणकार्ये आर्त्विज्यादौ विधानासंभवा
दर्थवादः। अग्निब्राह्मणोः सृष्टिकाले ब्रह्मणो मुखाज्जातत्वादग्निशब्दो ब्राह्मणे गौणः। जातिशब्दे
न च जन्मोच्यते स्वस्यार्थवादस्य स्वार्थे प्रामाण्याभावेन ब्रह्ममुखाज्जननाभावेपि अर्थवादान्त
रेतदुक्तिमात्रेणार्थवादोपपत्तिः। वयं तु सर्वे हि मनुष्याः पूर्वं मंजदारु इतिवत्। अग्न्याद्यौ ब्राह्मण
त्वाग्ने ब्राह्मणकार्ये ग्नि विधानार्थे मिथ्यस्तुतिरिति विवादमः। सारूप्यात्। आदित्यो यूपो यजमानो

६८

135

यूपयेत्र इत्यत्रादित्यस्य यूपकार्ये पशुनियोजने विधातुमशक्तेर्यजमानस्य च यूपकार्ये विहितस्याति
खननापत्त्यास्वपदार्थकरनलोपापत्तेर्यजमानादित्यप्रशस्तत्वं यूपस्तूयते। सारूप्यं चात्र गौण
त्वे निमित्तं। ननु तत्सिद्ध्यादावपि समानधर्मत्वलक्षणं सारूप्यमेव गौणत्वे निमित्तं को ऽत्र विशेषः। स
त्यं च पशुगणसमिह सारूप्यं विवक्षितं। चाक्षुषं हि यूपस्योर्ध्वत्वलक्षणं यजमानसारूप्यं अंजननिमि
त्ते तेजस्वित्वलक्षणं चादित्यसारूप्यं। अतो यमस्तुतिः। प्रशंसा। अपशवो वा अन्ये गो अश्वेभ्यः प
शवो गो अश्वा इत्यत्र गवाश्वातिरिक्तस्य न पशुकार्ये प्रतिषेधसंभवविअजादीनां पशुयागादौ विधा
नात्तेभ्यो ऽप्यतो पवादः। तत्र चापशव इति नञ्समासगतेन नगतेन पशुशब्देन गवाश्वपरसमस्तिव्याहृत
तस्ते प्राशस्त्यं लक्षयित्वा तदन्नावो ऽन्यपशुषु नञा बोध्यत इति पशुभिन्नत्वघटादिवचनस्यापशुशब्द
स्याजादिष्वप्रयोगो गवादिगतप्राशस्त्याभावनिमित्तो गौणः। तदुक्तमाचार्यैः गवाश्वादिगतापूर्वमु
पास्य प्रशस्तता। तदन्नावोन्यपश्वादौ नञ् समासेन कथ्यत इति। तात्सिद्ध्यादौ प्रशंसा गौणवृत्तिः फल

त्वेनोक्ता। इह कारणत्वेनेति नेदं ... अत्र स्वस्तीरूपदघातीत्युदाहरणं। स्वस्तिप्रकाशकमंत्रकरण
कोपधानादृष्टकार्यपदघातीत्यर्थः। तद्गानासामुपधाने मंत्रद्वतीष्टकामनुकूचमतोरितिपाणि
निसूत्रात्। आद्योपधानबोधकोऽस्वादपेक्षं पिनष्टीतिवदनुवादइतिजीर्णाः। नवीनास्तु आद्योपधा
नबोधोन प्राप्तः किं त्वापर्यं इत्याहुः। तत्रैव कयास्तु वृत प्रजाधीयेतत्र जापतिरधिपातिरधिपति।
रासीदित्याद्येमंत्रस्य स्वदृदशास्वपृदशोत्र मंत्रावितित्र्ययोमंत्रा अस्वस्तिलिंगाः। तिस्त्रानिरस्तु वा।
तेवृसास्तज्ञतवृसरणस्यातिरधियतिरासीदित्यादयष्वदशमंत्राः। स्वस्तिलिंगः स्वजिधातुयो
गात्। स्वस्तिमंत्रसमुदाये स्वस्ति मंत्रसमुदाये च स्वस्ति च सास्तीत्यनेन सादृश्येन स्वस्ति
प्राप्तः सपृदशामंत्रपुगेगणमनुकल्पविधौगौणीतिचेत्। अत्र नाप्यकारः। उपधानमेवात्र विधे
येन मंत्राः लिंगप्रकरणाभ्यामेव तेषामुपधाने प्राप्तेः। न च स्वस्ति मंत्रैरेवोपधानं कर्तव्यमिति
नियंतरपरिसंख्येति वाच्यं लिंगप्रकरणविनियोज्यमंत्रांतराणां वैयर्थ्यापत्तेः। तापीष्टका

विधेयाः । इष्टकासामान्यस्यैव इष्टकाभिरग्निं चिनुत इत्यनेन प्राप्तेः नापि सृष्टिशब्दाद्वा ग्राह्य इष्टकाविशेषः ।
सृष्टिशब्दप्रतिपाद्येष्टकाविशेषस्यानुपपत्तेः । न च सृष्टिमत्त्वेनोपधीयत इत्यस्यैव विशेषोपाख्यातिः । एवं वि
धानामिष्टकानामेतस्माद्वाक्यात्पूर्वमज्ञातत्वेन विधेयत्वायोगात् । ज्ञातत्वेऽनतद्बुद्धिविधेयत्वप्रा
प्तेश्च । तस्मादुपधानमेवात्र विधेयम् । न चेष्टकाभिरग्निं चिनुत इति विहितचयनान्यथानुपपत्त्यैवो
पधानप्राप्तमिति वाच्यम् । स्थलसंपादनरूपे चयने तृतीयाश्रुत्येष्टकानां गुणत्वावगमपदेनैकोप
धानप्राप्तेः । सृष्टीरित्यत्र तु द्वितीयाश्रुत्योपधानस्येष्टकागुणत्वावगतेः प्रतीष्टकमुपधानसिध्यर्थं
तद्बुद्धिरावश्यकी । अतो यथा उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयतीत्यनेन प्रथनमेव विधेयं मं
त्रग्रहणं त्वर्थवादोपपत्त्यर्थं तथात्रोपधानमेव विधेयं सृष्टीरिति मंत्रग्रहणं तु यथा सृष्टमेवावरु
न्ध इत्यर्थवादोपपत्त्यर्थं तथात्रोपधानमेव विधेयं सृष्टीरिति मंत्रग्रहणं तु यथा सृष्टमेवावरुन्ध इ
त्यर्थवादोपपत्त्यर्थं । अतः सृष्टिशब्दस्य लिंगप्रकरणप्राप्तमन्त्रानुवादकत्वान्न गौणी दोषायेत्याह ।

७०

वार्त्तिककारस्तु नात्रोपधाने विधीयते चित्रिणि रूपदधातीत्यादिष्वपि तु उपधानमात्रविधानापत्तेः।
नेष्टापत्तिः। उक्तविधीनां मन्त्रविधायकत्वाभावेन दृष्टकारूपदधातीत्येवं रूपत्वापत्तेरेकेनापु
पधानविधिना विवक्षितसिद्धेरिति रविधिवैयर्थ्यापत्तेः। अतः स्वेनाधाकारवितिरूपसंपा
दनेस्य प्रतीष्टकमुपधाने विना असिद्धे रूपधानस्य प्राप्तत्वात्तदनुवादेन मन्त्रविधिः। न चालिं
गप्रकरणाभ्यामेव सादिमन्त्राणामुपधाने प्राप्यामन्त्रान्तरपरिसंख्यापत्तेर्न मन्त्रविधिरिति।
वाच्यं सादिमन्त्रेषूपधाने कांतिकलिंगाभावादिष्टकानां ग्रहणासादनादिष्वपि प्राप्तिप्रसक्तेः।
तथा च सादिभिरेवोपधाने कर्तव्यमिति न शेषपरिसंख्यार्थे मन्त्रविधिः। किंतु सादिभिरूप
धानमेव कर्तव्यं न ग्रहणादौ निषेधपरिसंख्यार्थः। न च तु वा सादिमन्त्राणामुपधाने कांति

मेरू

कलिंगं तथापि मध्यमचितिसंबन्धार्थं मन्त्रविधानमावश्यकं। यां वै कां च न ब्राह्मणवन्तीमिष्ट
कामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनात्। अतः स्वीरित्येतन्मन्त्रविधा

७०

139

यकमेवनानुवादः।कथंतर्हि विधौगौणी तिचेन्न।सखीरूपदधातीत्युपक्रम्य एकयास्तुवतेत्यादि सप्रद
शमंत्रसाधनकोपधानानामिष्टकानांप्रत्येकंस्तुतिकृत्वायत्सप्रदशेष्टकाउपदधातीत्युपसंहारात्तद्वग
तेरित्याहुः।लिंगसमवायात्।इहप्राणभृत्तउपदधातीत्यत्राहृत्यपूर्वंतत्सर्वोपिविचारःकर्तव्यः।विशेषस्तु
तावान्पूर्वाधिकरणेन्नामागौणत्वानिमित्तमुक्तं।इहलिंगसमवायोन्यत्वमित्यर्थः।प्राणभृदप्राणभृ
त्संत्रसमुदायेप्राणभृत्तामत्यत्वात्।संदिग्धेषुवाक्यशेषात्।विधिगतानामुद्भिदादिपदानांविधायक
त्वनिमित्तनामधेयत्वेनोपयोगेप्रतिपादितेर्थवादानामपिस्तावकत्वानिमित्तेनसंदिग्धार्थनिर्णायकत्वे
नोपयोगः।प्रतिपाद्यते।काटकाग्नौग्नौष्ठयतेअक्ताःशर्कराउपदधाति।तेजोवैघृतमितितत्रसंप्रा
यः।किंघृततैलवसानामन्यतमेनांजनकर्तव्यमुतघृतेनैवेति।प्रारोचनानपेक्षविधिपर्यवसानसं।
नवान्यांसंदेहः।तदर्थमपिकिंविध्यर्थवादयोर्विरोधोस्तिनेतिविचार्यं।तत्रउपक्रमोपसंहारयोःसामा
न्यविसेषविषयत्वेनविरोधाद्विधेश्चार्थवादंप्रतिप्राधान्यादप्राप्तार्थत्वादुपक्रमस्यप्रबलत्वेनासंजातविरो

७१

धास्त्ववलीयस्त्वावगते वाक्यशेषस्य घृतशब्दोंऽजनसमर्थे तैलादि लक्षयतीति पूर्वपक्षः। सिद्धांतस्तु अ
क्ताद्रूपनेनाक्रियामात्रमेवोक्तं न द्रव्यं अतो नार्थवादविरोधः। न चांजनक्रियया तैलवसयोरप्याप्तेः पुः।
अंजनसाधनघृतस्तुत्यास्तत्प्रतीतिं बाधात्। अतो विरोधाभावात् घृतग्रहणमिति। यत्तु यथा ध्यायोत्पा
धिकरणे अग्नीषोमीयं पशुमालभेतेति सामान्यविधेश्छागस्य वपाया मेदसोऽनुब्रूहीति मंत्रवर्णा०
च्छागरूपविशेषपरत्वं स्थापयिष्यते। तत्र विधिमंत्रवर्णयोरेकवाक्यत्वाभावान्नैतदधिकरण
विषयत्वमित्युपोनरुक्त्यं। अर्थाद्वाकल्पनेनैकदेशत्वात्। सामान्यविधेरर्थवादानुरोधेन विशेषपर
त्वमुक्तं। इदानीं सामर्थ्याद्विशेषपरत्वं स्थाप्यते। स्रुवेणैवावघति स्वधितिनावघति हस्तेनावा।

७२

घतीति त्रीण्यवदानसाधनत्वेन विहितानि। अवदेयान्यपि द्रव्यमांसपुरोडाशादीनि विहितानी। तत्र
किमविशेषेण सर्वैः सर्वेषामवदानं कर्तव्यमुत यथासामर्थ्यमिति विचारः। तत्रांजलिना प्रदातव्ये
सक्तून् जुहोतीति होमसाधनत्वेन विहितोंजलिः किं देवताप्रसादार्थं नयप्रार्थनायामिव हस्तलल

संयोगरूपः कार्यं नु तत्सामर्थ्यात्पुष्पांजलिदानादाविव आक्रोशरूप इति विचारः तत्र स्रुवस्वधितिस्याम
पि पुरोडाशस्यावदातुं शक्यत्वात्संहत्त घृतस्य च हस्तेनाप्यवदातुं शक्यत्वादनियम इति पूर्वपक्षः। सिद्धां
तस्तु अव्यवस्थायामष्टदोषदुष्टविकल्पापत्तेः स्रुवस्वधित्योः पुरोडाशमध्यगतांगुष्ठपर्वमात्रावदाने
सामर्थ्याभावात्स्रुहवस्तयोश्च मांसावदाने सर्वथैवासामर्थ्याद्घृतस्य च विलापनाभावेन संहतत्वाभा
वाद्धस्तस्वधित्योस्तदवदाने सामर्थ्याभावाद्व्यवस्था। एवं हस्ततलसंयोगरूपस्यांजलेः सक्तुधारक
त्वेनादृष्टार्थत्वापत्तेराक्रोशासिद्धिः। तथा च सामर्थ्यात्स्रुवेणावद्यतीत्यादौ द्रुवामित्यादिवाक्यशेषः
कल्प्यत इति सिद्धं तृतीयाध्याये मन्त्रसामर्थ्यादिदं प्रकाशयेदित्यादिश्रुतिः। स्वातंत्र्येणैव कल्प्यते इ
ह तु वाक्यशेषत्वेनेत्यपौनरुक्त्यं। न चात्र सामर्थ्याद्व्यवस्थारूपोर्थ एव कल्प्यतां न द्रुवामित्यादिवाक्ये
ष इति वाच्यं वेदादिन्नस्य धर्मे प्रामाण्याभावात्। अन्यथा मंत्रलिंगादपि श्रुतिर्न कल्प्येत। ननु सामा
न्यतः प्रवृत्तस्य विधेः सामर्थ्यकाल्पिते नयथा शक्नुयात् तथा कुर्यादिति वाक्यशेषेण संकोचादंधादी

७२

नामप्यधिकरणप्रश्नोऽस्तिर्यगधिकरणविरोधःस्यादितिचेत्।न।संदेहेसतितदपनयार्थंवाक्यशेषः
कल्प्यतेनचाज्यावेक्षणादिकर्तव्यंनवेतिसंदेहोऽस्ति।विधेस्तुकस्मतित्वादित्येकादशाध्यायाद्यपाद
स्याधिकरणेसर्वांगोपसंहारस्साधनात्।नचकिमधिकारशास्त्रानुरोधेनसर्वांगानुष्ठापकंप्रयोग
शास्त्रेशक्यांगमात्रविषयंकिंवाप्रयोगशास्त्रानुरोधेनाधिकारशास्त्रेसर्वांगोपसंहारसमर्थपुरुष
विषयमितिसंदेहाद्यथाशक्नुयादितिवाक्यशेषःकल्प्यतामितिवाच्यम्।अनुष्ठेयज्ञानोत्तरमेवाधि
कार्यपेक्षणादनुष्ठेयबोधकप्रयोगशास्त्रानुरोधेनैवाधिकारशास्त्रप्रवृत्तेर्निश्चयेनसंदेहाभावा
त्।अतोयथाशक्नुयादितिवाक्यशेषकल्पनायावज्जीवमग्निहोत्रंजुहोतीत्यादिनैमित्तिकाधिका
रविषया।नैमित्तिकप्रयोगविधिकल्पनेनिमित्तश्रवणस्योपजीव्यत्वात्तदुपजीवकेप्रयोग
विधौनिमित्तानुरोधेनैवांगकर्तव्यताबोधात्।नचयथाजीवनस्यकादाचित्कत्वान्नोवेन
निमित्तत्वासंभवात्पौर्णमास्यादिकालावच्छिन्नस्यैवनिमित्तत्वेनयथाज्यावेक्षणाद्यंगप्राप्त्या

७२

७३

वेवानिमित्तत्वामितिवाच्यं। अनुष्ठेयांगानामननुष्ठेयनिमित्तानवछेदकत्वादिति॥ ॥
रामेश्वरपुत्रोनारायणशर्मणः॥ ॥श्रीरामकृष्णसूनुर्दिनकरशर्माकरोत्सुग्रंथं॥
इत्यमारामकृष्णसुतदिनकरकृतेश्राद्धदिनकरेप्रथमोध्यायः समाप्तः॥ ॥ ॥
श्रावनेमासेकृष्णपक्षेतिथौ १२ रविवासरेतद्दिनपुस्तकंसमाप्तंसंवत्अठारेसेत्रेसठि
याद्दृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया यदिसुद्धमसुद्धंवाममदोषोनदीयते॥ ॥

७३

[OrderDescription]
,CREATED=22.09.20 15:33
,TRANSFERRED=2020/09/22 at 15:51:46
,PAGES=144
,TYPE=STD
,NAME=S0003648
,Book Name=M-1668-BHATTDINKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,